गद्यमञ्जरी

काव्यतीर्थसाहित्याचार्योपाधिधारिणा

श्रीमता श्रीधरशर्मणा

संगृहीता

प्राप्तिस्थानम्

छात्रहितकारी पुस्तकालय

दारागंज, प्रयाग

प्रथमसंस्करणम्] १९३० [मूल्य १)

विषय-सूची

सुमतिसचिवकथा

कस्मिंश्चिद्देशे शूरसेनो नाम राजाऽऽसीत्। स सुतनिर्विशेषं प्रकृतीः पालयन् सुखेन कालं निनाय ।

सुमतिर्नाम तस्य मन्त्री। नृपतिस्तस्मिन्नत्यर्थं प्रीतिमानासीत्। तस्य सचिवस्य ईश्वरे परमा प्रीतिर्बभूव । 'जगतीह नक्तन्दिवं यत् किञ्चिद् घटते तत् सर्वमेव शुभाय' इत्येव तस्य बुद्धिरासीत्। शुभं वाप्यशुभं किञ्चिद् धीरस्यास्य चित्तं विकलयितुं न प्रभवति स्म। विधातृविहितं सर्वं स मङ्गलायैव मन्यते स्म । "भगवता विधात्रा यदेव विधीयते तत् सर्वमेव शुभाय" इति स सर्वदैवाकथयत् ।

नृपतिरपि तस्य मुखादनिशम् एवमाकर्णयन् कदाचिदचिन्तयत्—"अहो! किमप्येनं वीतधैर्यं कर्तुं नालम्। भवतु तावदहमस्य धैर्य्यं परीक्षिष्ये।"

सुतनिर्विशेषम्—पुत्रवत्। प्रकृतीः—प्रजाः। कालं निनाय—समयं व्यतीतमकरोत्। अत्यर्थम्—अत्यधिकम्। प्रीतिमान्—स्नेहवान्। प्रीतिः—भक्तिः। नक्तंदिवम्—रात्रौ दिने च। घटते—भवति। विकलयितुम्—व्याकुलं कर्तुम्। न प्रभवति स्म—समर्थं न बभूव। अनिशम्—सर्वदा। वीतधैर्यम्—अधीरम्। न अलम्—न समर्थम्।

अथ दैवेन नृपतेरङ्गुल्यां स्फोटकः सञ्जातः । तेन सोऽत्यर्थं क्लिश्यमानो 'मन्त्रिणमेवं विज्ञापय' इति आदिश्य कश्चिद् दूतं प्रेरितवान् ।

सचिवस्तस्य मुखतः प्रवृत्तिम् एतामासाद्य स्वभाव-धीरतया "भगवता विधात्रा यदेव विधीयते तदेव शुभाय" इति प्रतिभाषणं प्रेषयामास ।

नृपतिस्तदवगमात् कोपस्फुटितलोचनोऽवदत्–"अहो! धिगिमं जाल्मम् । यत् क्लिष्टमपि मां नानुकम्पते । तस्ये-दमौदासीन्यं न मया कदापि सोढव्यम्" ।

अथ कदाचित् पीडयास्याङ्गुलिः स्खलिता बभू राजा च भूयसा क्लेशेन संशयितजीवितोऽभवत्–'मन्त्रिणं ज्ञापय' इति आदिश्य भूयः कश्चिद् दूतं प्रेरितवांश्च ॥

सचिवोऽपि निशम्यैतत् "भगवता विधात्रा यदेव विधीयते तदेव शुभाय" इति प्रतिवचनं ददौ ।

आदिश्य–आज्ञां दत्वा । प्रवृत्तिम्–वृत्तान्तम् । प्रति-भाषणम्–प्रत्युत्तरम् । जाल्मम्–दुष्टम् । न अनुकम्पते–सहानु-भूतिं न प्रकाशयति । स्खलिता–गलिता । संशयितजीवितः–संदिग्धजीवनः । निशम्य–श्रुत्वा । प्रतिवचनम्–प्रत्युत्तरम् ।

नृपतिरपि श्रुत्वैतदचिन्तयत् 'स्वस्थश्चेत् नूनमेनं हनिष्यामि'।

अथ दिष्ट्या स रोगान् निर्मुक्तो बभूव। गतेषु दिनेषु असौ सदः समेत्य प्रजानामानन्दं वर्द्धयामास।

सचिवोऽपि राजसकाशमागत्य यथाविधि तमभिननन्द। नृपतिस्तु न मधुरवाचा तं पुनः सम्भाषयामास।

अथैकदा राजा मृगयायै यातुकामो मन्त्रिणं प्राह— "भो मन्त्रिन्! यथारीति मृगयागमनोद्योगं विधेहि"।

सोऽपि च 'देवपादा यथाज्ञापयन्ति' इत्युक्त्वा सर्वमेवानुष्ठितवान्।

ततः स नृपतिरश्वमारुह्य बहुभिर्लोकैरनुगम्यमानो मन्त्रिणा सह प्रतस्थे। निबिडकाननाभ्यन्तरमासाद्य अनुचरान् सर्वानादिदेश—"युष्माकं दूरमनुसरणेनालम्। मन्त्रिणानुगतोऽहं दूरतरवनमध्यमवगाहिष्ये। भवन्तश्च

स्वस्थः—नीरोगः। सदः—सभाम्। राजसकाशम्—राज्ञः समीपम्। अभिननन्द-तुष्टाव। मृगयायै-आखेटाय। यातुकामः-गमनेच्छुः। प्रतस्थे (चल पड़ा)। युष्माकम्..............
अलम्-युष्माभिर्मया सह बहुदूरं यावत् नागन्तव्यम्। अवगाहिष्ये—भ्रमिष्यामि।

सायं यावत् मे प्रत्यावर्त्तनमपेक्ष्य गृहं प्रतिनिवर्त्तन्ताम्"।

ततो राजा मन्त्री च अश्वमारुह्य द्रुतं गभीरवनमध्यं प्रविवेश।

सहसा कूपमेकमालोक्य नृपतिरचिन्तयत्—"अवसरोऽयं सम्यगस्माकं सङ्कल्पसिद्धेः। तृषाव्याजमवलम्ब्य जलानयनार्थं मन्त्रिणमादिशामि। कूपसन्निहितं चैनं कूपमध्ये पातयामि" इत्यवधार्य्य मन्त्रिणं प्राह-"सुमते! महती मे पिपासा जाता। नाहं दूरतरं गन्तुं शक्नोमि। कूपोऽयमाराद् दृश्यते। पश्य, तत्र जलमस्ति न वा"।

मन्त्री नृपतेराज्ञया कूपसन्निधिं गत्वा नततुण्डो यावज्जलं निरीक्षते तावद् राजा झटिति पृष्ठतस्तं कूपे निचिक्षेप।

सचिवोऽपि पतन्नेव "भगवता विधात्रा यदेव विधीयते तदेव शुभाय" इत्युक्त्वा कूपमध्ये पपात।

प्रत्यावर्त्तनम्—निवर्तनम्। अपेक्ष्य—प्रतीक्ष्य। सहसा—अकस्मात्। तृषाव्याजम्—पिपासामिषम्—(प्यासका बहाना)। आदिशामि—आज्ञापयामि। आरात्—समीपे। नततुण्डः—अवाङ्मुखः (मुंह नीचा करके)।

राजापि विवृत्तवदनस्तूर्णं ततः प्रतस्थे ।

तदा सन्ध्या समागतासीत् । भगवान् काश्यपेयः स्वीयमयूखान् संहृत्य अस्ताचलशिखरारोहणोन्मुखो बभूव । दिनकरविरहेण सन्तापितचित्ता धरणी तमोवसनं पिनह्येव वयसां रुतव्याजेन मानसीं व्यथां प्रकटयामास ।

श्वापदोः सर्वे प्रहृष्टमनसो विवरान्निष्क्रम्य समन्तात् परिधावितुमारेभिरे ।

नृपतिः कथञ्चिद् वनपथाद् बहिरायातुमसमर्थः सन्निहितं वृक्षमेकमारुह्य अवतस्थे । अश्वोऽपि तदधस्तात्तस्थौ ।

अथ निशीथसमयः सम्भूतः । सहसा वनभागं प्रकम्पयन्निव तत्रैव महान् कोलाहलः समुत्थितः ।

नरपतिस्तु 'कश्चिदतर्कितो विपत्पात आपतितोऽयम्'

विवृत्त वदनः—पराङ्मुखी भूय (मुंह फेर कर) काश्यपेयः—सूर्यः । मयूखान्—किरणान् । संहृत्य—संकोच्य । धरणी—पृथ्वी । वसनं—वस्त्रम् । पिनह्य—आच्छाद्य (ओढ़ कर) । वयसाम्—पक्षिणाम् । रुतव्याजेन—शब्दमिषेण ।

श्वापदाः—व्याघ्रादिहिंस्रजन्तवः । विवरात्—बिलात् । निष्क्रम्य—बहिरागत्य । परिधावितुम् आरेभिरे—(दौड़ने लगे) । अवतस्थे—स्थितः । निशीथसमयः—मध्य-रात्रः । अतर्कितः—अचिन्तितः ।

इति मत्वा यावत् पश्यति तावदारात् समागच्छतो बहून् लोकानवलोकयामास ।

तेऽपि शनैः शनैर्वृक्षाभ्याशमेत्य सज्जिततुरङ्गमेकमालोक्य परस्परं कथयामासुः "सिद्धमेव साम्प्रतमस्माकमभिलषितम् इति । तुरङ्गमेन 'मानवसमागमोऽत्र' इति संसूच्यते। इदानीमेनमनुसन्धाय राजसकाशं नेष्यामः। अस्माकं नृपतिरपि श्वः प्रातश्चामुण्डायै बलिमुपहारीकृत्य सिद्धकामो भविष्यति"।

इत्याकर्ण्य नृपतिर्वृक्षारूढः संज्ञाहीन इव पत्रान्तरालमध्यवर्ती तस्थौ।

सहसा तेषामेकतमो "वृक्षेऽस्मिन् मानवो दृश्यते मानवो दृश्यते" इत्युच्चैरपरान् ज्ञापयामास ।

तत्क्षणमेव कश्चिद् वृक्षमारुह्य राजानं बद्ध्वा वृक्षात् तस्मादवतारयामास ।

अथैनमश्वमारोप्य विजयगीतिं गायन्तः सर्वे यथागतं चलिताः ।

अभ्याशम्—समीपम् । अनुसंधाय—अन्विष्य । उपहारीकृत्य—निवेद्य । संज्ञाहीनः-चेतनारहितः । अवतारयामास—अवरोहयामास (उतारदिया)। आरोप्य-(चढ़ाकर ।

राजा च 'आत्मकर्म्मफलानुरूपमेतद्' इति विज्ञाय स्थाणुवत् तस्थौ ।

ते च स्वं नृपातिमुपागम्य 'आसादितोऽयं बलिः' इति निवेदयामासुः ।

राजा च 'एनं कारागृहे स्थापय' इति आदिश्य चामुण्डामन्दिरं ययौ ।

अथ क्रमेण निशावसानमभूत् । ढक्कादुन्दुभिपटह-निनादैर्नृपभवनमचिरेण पूर्णमभवत् । समीरणैः समन्ततः सञ्चाल्यमानै रक्तध्वजैरुपशोभितं देवीमन्दिरं बभूव । राजा च परिहितरक्तवसनो रक्तचन्दनानुलिप्तो रक्तमाल्यो-पशोभितो "मातश्चामुण्डे ! प्रसीद प्रसीद बलिमिमं गृहाण" इति कथयन् यावद् देव्याः पुरतो वन्दिनं राजानं संस्थाप्य तस्यावयवं निरीक्षाश्चक्रे, तावत् तमङ्गुष्ठेन हीनमा-लोक्य "आः पापाः किमिदम्, हीनाङ्गुष्ठ नरमिमं कथं बलिरूपेण चामुण्डायै दास्यामि" इति कथयित्वा तं दूरी-

---

आत्मकर्म फलानुरूपमेतद्—यादृशं मया कर्म कृतम्, तादृशमेव तस्य फलमपि लब्धम्—इति भावः। स्थाणुवत्—कीलवत्, निश्चेष्टः। कारागृहे—(जेलखाने में) । अव-सानम्-अन्तः। अचिरेण—स्वल्पकालेन । समीरणैः—वायु-भिः। परिहितम्—धारितम्। वन्दिनम्—(कैदी)।

चकार । पूर्णावयवमन्यमेकमानेतुमादिदेश ।

नृपतिरयं दिष्ट्या प्राणान् प्राप्य पलायाञ्चक्रे ।

अथ स काननमासाद्य चिन्तयामास—“अहो ! यदेव सचिवेनोक्तं सत्यमेव तावत् सर्वम् । ‘भगवता विधात्रा यदेव विधीयते तदेव शुभाय’ इति मयाद्य सम्यक् परीक्षितम् । अङ्गुष्ठहीनं नूनमद्य स मां नावधीत् ।

अहो ! कुत्र स मे मन्त्री, कुत्र स मे भगवत्परायणो धार्मिककुलशेखरो विवेकचूडामणिर्ममैकबन्धुः ? धिङ् मां यदहं कारणमन्तरेण तं हतवान् । किमद्यापि स जीवति ? भवतु, गत्वा तत्र द्रक्ष्यामि ।”

तावदवधार्य स लघुपदं तत्कूपसन्निधावागत्य, “धार्मिकप्रवर ! सुमते ! ममैकाप्रियबन्धो ! सचिवराज ! किमद्यापि जीवसि ? देहि मे प्रतिवचनम्” इत्युच्चैस्तमाजुहाव ।

नृपतेवर्चः श्रुत्वा मन्त्री कूपादतीवार्त्तस्वरेण प्रोवाच

दिष्ट्या—दैवात् सौभाग्येन । पलायाञ्चक्रे-प्रधावितः । नूनम्-निश्चयेन । शेखरः—भूषणम् । चूडामणिः—शिरोमणिः । अन्तरेण-विना । लघुपदं—शीघ्रम् । आजुहाव—संबोधयामास आर्तस्वरेण—दुखितस्वरेण ।

"महाराज ! मृतकल्पोऽत्र तिष्ठामि, यदीच्छसि मामुद्धर,

ततो नृपतिस्तूर्णं तं कूपादुज्जहार । वारशश्चात्मदोषं स्वीकृत्य क्षमस्वेति भूयो भूयश्चानुनयि मन्त्रिणं प्रसादयामास ।

मन्त्रिणोक्तम्--"महाराज ! किमिदम्, किमेवं कथयसि, किमापतितं भवतां देवपादानाम्, कथमीदृशीमवस्थामापन्नोऽसि, कथं हि ते दृष्टिरियं कातरा वर्तते ?"॥

ततो राजा प्राह--"मन्त्रिन् ! सत्यमुक्तं भवता ।'भगवता विधात्रा यदेव विधीयते तदेव शुभाय' इत्यत्र नास्ति मे कश्चित् सन्देह" इत्युक्त्वा तस्यादितो यद् वृत्तं तत् सर्वं कथयामास ।

तदाकर्ण्य मन्त्री किञ्चित् विहस्य प्रोवाच—"महाराज ! ममापि कूपे निक्षेपो भगवता अनुमोदित एव । हीनाङ्गस्य भवतो मुक्तिश्चेदपि त्वत्सङ्गिनः पूर्णावयवस्य ममैव परित्राणं न कथमप्यभविष्यत् । अतो ज्ञायतामेतद् देवपादैर्यद् भगवता विधात्रा विधीयते तदेव शुभाय" ।

ततस्तौ परस्परं प्रीतौ स्वराज्यं प्रतिनिवृत्तौ ॥

मृतकल्प-मृतसदृश । उद्धर-बहिर्निष्कासय । उज्जहार बहिर्निष्कासितवान् । अनुनीय-आश्वास्य । सकातरा-सभया । अनुमोदितः-समर्थितः । प्रीतौ-प्रसन्नौ ।

उपमन्युकथा

धौम्यस्यापोदस्य ऋषेः उपमन्युर्नाम शिष्य आसीत्, तमुपाध्यायः प्रेषयामास-'वत्सोपमन्यो ! गा रक्ष' इति । स उपाध्यायवचनाद् गा अरक्षत् । स चाहनि गा रक्षित्वा दिनक्षये गुरुगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ।

तमुपाध्यायः पीनमपश्यद्, उवाच चैनम् "वत्सोपमन्यो ! केन वृत्तिं कल्पयसि, पीवाऽसि दृढम्" इति ।

स उपाध्यायं प्रत्युवाच —"भो ! भैक्ष्येण वृत्तिं कल्पयामि" इति ।

तमुपाध्यायः प्रत्युवाच—"मय्यनिवेद्य भैक्ष्यं नोपभोक्तव्यम्" इति ।

स 'तथा' इत्युक्त्वा भैक्ष्यं चरित्वोपाध्यायाय न्यवेदयत् ।

दिनक्षये-सायंकाले । उपाध्यायस्य-गुरोः, अध्यापकस्य । पीनम्-पुष्टम् । केन-केन प्रकारेण । वृत्तिम्-जीवननिर्वाहम् । कल्पयसि-करोषि । पीवा-पुष्टः । भैक्ष्येण-भिक्षया । अनिवेद्य-असमर्प्य ।

स तस्मादुपाध्यायः सर्वमेव भैक्ष्यमगृह्णात् ।

स 'तथा' इत्युक्त्वा पुनररक्षद् ।

गा अहनि रक्षित्वा निशामुखे गुरुकुलमागत्य गुरोः पुरतः स्थित्वा नमश्चक्रे ।

तमुपाध्यायस्तथापि पीवरमेव दृष्ट्वोवाच —"सर्वमशेषतस्ते भैक्ष्यं गृह्णामि केनेदानीं वृत्तिं कल्पयसि" इति ।

स एवमुक्त उपाध्यायं प्रत्यभाषत—"भगवते ! निवेद्य पूर्वम्, अपरं चरामि, तेन वृत्तिं कल्पयामि" इति ।

तमुपाध्यायः प्रत्यवदत्—"नैषा न्याय्या गुरुवृत्तिः, अन्येषामपि भैक्ष्योपजीविनां वृत्त्युपरोधं करोषीत्येवं वर्तमानो लुब्धोऽसि" इति ।

स 'तथा' इत्युक्त्वा गा अरक्षद् । रक्षित्वा च पुनरुपाध्यायगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ।

तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच—"वत्सोपमन्यो ! अहं, ते सर्वं भैक्ष्यं गृह्णामि, न चान्यच्च-

---

भैक्ष्यंचरित्वा—भिक्षां याचित्वा । निशामुखे—प्रदोषकाले, दिनान्ते । पीवरम्-पुष्टम् । अपरं चरामि-पुनर्भिक्षां याचामि । न्याय्या-उचिता । भैक्ष्योपजीविनाम्-भिक्षावृत्तिं कुर्वताम् । वृत्त्युपरोधम्—जीविकानिरोधम् ।

रसि, पीवाऽसि भृशं केन वृत्तिं कल्पयसि" इति ।

एवमुक्तः स उपाध्यायं प्रत्युवाच—"भो! एतासां गवां पयसा वृत्तिं कल्पयामि" इति ।

तमुवाचोपाध्यायो—"नैतन्न्याय्यम् । पय उपभोक्तुं भवतो मया नाभ्यनुज्ञातम्" इति ।

स 'तथा' इति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्याय-गृहमुपेत्य गुरोरग्रतः स्थित्वा नमश्चक्रे ।

तमुपाध्यायः पीवरमेव दृष्ट्वोवाच —"वत्सोपमन्यो! भैक्ष्यं नाश्नासि, न चान्यच्चरसि, पयो न पिबसि, पीवाऽसि भृशं केनेदानीं वृत्तिं कल्पयसि" इति ।

स एवमुक्त उपाध्यायं प्रत्युवाच—"भोः! फेनं पिबामि, यमिमे वत्सा मातॄणां स्तनान् पिबन्त उद्गि-रन्ति" इति ।

तमुपाध्यः प्रत्युवाच—"एते त्वदनुकम्पया गुण-वन्तो वत्साः प्रभूततरं फेनमुद्गिरन्ति, तदेषामपि वत्सानां

अभ्यनुज्ञातम्-अनुमतम् । अश्नासि-भुङ्क्षे । फेनम्-(झाग)। उद्गिरन्ति-उद्वमन्ति (उगलते हैं)। अनुकम्पया—दयया ।

वृस्युपरोधं करोष्येवं वर्तमानः । फेनमपि भवान् न पातुमर्हति" इति ।

स 'तथा' इति प्रतिश्रुत्य निराहारः पुनररक्षद् गाः । तथा प्रतिषिद्धो भैक्ष्यं नाश्नाति, न चान्यच्चरति, पयो न पिबति, फेनं नोपभुङ्क्ते ।

अथ स कदाचिदरण्ये क्षुधार्तोऽर्कपत्राण्यभक्षयत् । तदा तैरर्कपत्रैर्भक्षितः क्षारातिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव । ततः सोऽन्धोऽपि चङ्क्रम्यमाणः कूपेऽपतत् ।

अथ तस्मिन्ननागच्छति सूर्ये चास्ताचलावलम्बिनि शिष्यानवददुपाध्यायः-"मयोपमन्युः सर्वतः प्रतिषिद्धः, स नियतं कुपितस्ततो नागच्छति, चिरगतस्त्वसौ तस्मादन्वेषयत" इत्येवमुक्त्वा शिष्यैः सार्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार—"भो उपमन्यो ! क्वासि वत्स, एहि" इति ।

प्रतिश्रुत्य—प्रतिज्ञाय । उपहतः—पीडितः । चङ्क्रम्यमाणः—इतस्ततो भ्रमन् । नियतम्—अवश्यम् । चिरगतः—यस्य गतस्य चिरं जातम् । अन्वेषयत—(ढूँढो) ।

स उपाध्यायस्याह्वानवचनं श्रुत्वा प्रत्युवाचोच्चैः— "अयमस्मिन् कूपे पतितोऽहम्" इति।

तमुपाध्यायः प्रत्युवाच "कथं त्वमस्मिन् कूपे पतित" इति।

स उपाध्यायं प्रत्यभाषत—"अर्कपत्राणि भक्षयित्वाऽन्धीभूतोऽस्म्यतश्चङ्क्रम्यमाणः कूपे पतित" इति।

तमुपाध्यायः प्रत्युवाच—"अश्विनौ स्तुहि, तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्तारौ" इति।

एवमुक्त उपाध्यायेनोपमन्युः स्तोतुमुपचक्रमे देवावश्विनौ—"स्तोतुं न शक्नोमि गुणैर्भवन्तौ,

चक्षुर्विहीनः पथिसम्प्रमोहः।
दुर्गेऽहमस्मिन् पतितोऽस्मि कूपे,
युवां शरण्यौ शरणं प्रपद्ये॥"

एवमादिभिः पद्यैः तेनाभिष्टुतावश्विनावाजग्मतुराहतुश्चैनम्—"प्रीतौ स्वः, एष तेऽपूपोऽशानैनम्" इति॥

अश्विनौ-अश्विनीकुमारौ। देवभिषजौ-देवानां वैद्यौ। उपचक्रमे आरम्भ कृतवान्। संप्रमोहः—भ्रान्तिः। शरण्यौ—शरणागतरक्षकौ। प्रपद्ये—प्राप्नोमि। आहतुः—उक्तवन्तौ इतिभावः। अपूपः—[पूआ] अशान—भुङ्क्ष्व। प्रत्यनुनय—प्रार्थये- [विनती करताहूं]

स एवमुक्तः प्रत्युवाच "नानृतमूचतुर्भगवन्तौ, न त्वहमेतमपूपमुपभोक्तुमुत्सहे गुरवेऽनिवेद्य इति" ।

ततस्तमश्विनावूचतुः—"आवाभ्यां पुरस्ताद्भवत उपाध्यायेनैवमभिष्टुताभ्यामपूपो दत्त उपभुक्तस्तेन स गुरवेऽनिवेद्य, त्वमपि तथा कुरुष्व यथा कृतमुपाध्यायेन" इति ।

स एवमुक्तः प्रत्युवाच—'एतत् प्रत्यनुनये भवन्तावश्विनौ, नोत्सहेऽहमनिवेद्य गुरवेऽपूपमुपभोक्तुम्' इति ।

तमश्विनावाहतुः—'प्रीतौ स्वस्तवानया गुरुभक्त्या चक्षुष्मान् भविष्यसि, श्रेयश्चावाप्स्यसि' इति ।

स एवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागत्याभ्यवादयत् सर्वमाचचक्षे च ।

सोऽस्य प्रीतिमान् बभूवाह स्म चैनम् 'यथाऽश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसि, सर्वे च ते वेदाः प्रतिभास्यन्ति, सर्वाणि च धर्मशास्त्राणि' इति ।

न उत्सहे—उत्साहं न करोमि । श्रेयः—कल्याणम् । अभ्यवादयत्—पूणनाम । प्रतिभास्यन्ति—प्रकाशिष्यन्ते ।

ध्रुवकथा

स्वायम्भुवस्य मनोः प्रियव्रतोत्तानपादौ द्वौ सुतावास्ताम्। उत्तानपादस्य द्वे भार्ये बभूवतुः। अभीष्टायां सुरुच्यामुत्तमो नाम तस्यात्यन्तवल्लभः पुत्रो जज्ञे। सुनीत्यां नाम अपरस्यां राज्ञ्यां ध्रुवो नाम तनयः सम्भूतः। एकदा राजासनस्थितस्य पितुरङ्कमाश्रितं भ्रातरमुत्तमं दृष्ट्वा ध्रुवोऽपि तमारोढुं मतिं चक्रे। भूपतिस्तु प्रेयस्याः सुरुच्याः समक्षं प्रणयेनागतमुत्सङ्गारोहणोत्सुकं पुत्रं नाभ्यनन्दत्। अङ्कारोहणोत्सुकं ध्रुवं दृष्ट्वा सुरुचिस्तमुवाच'—वत्स' एष महान् मनोरथः किं क्रियते। एतद्राजासनं ममैव पुत्रस्य योग्यम्। किमात्मा क्लिश्यते त्वया। सत्यं, त्वमस्य राज्ञः सुतोऽसि, न पुनर्मदुदराज्जात' इति।

तद्वचनं श्रुत्वा बालः पितरमुत्सृज्य कुपितो मातुर्मन्दिरं जगाम। पुत्रं कुपितमीषत्स्फुरिताधरं दृष्ट्वा सुनीतिरङ्कमा-

---

स्वायम्भुवस्य-स्वयम्भू पुत्रस्य। अभीष्टायाम्-प्रियायाम्।

राजासनम्-सिंहासनम्। मतिश्चक्रे-इयेष। प्रणयेन-प्रेम्णा। उत्सङ्गः-अङ्कः। न अभ्यनन्दत्-अङ्क उपवेश्य न सम्मानयामास। मनोरथः—अभिलाषः। ईषत् स्फुरिताधरम्-

रोप्य तमभाषत 'वत्स, कः कोपहेतुस्ते; यस्तवापराध्यति स किं तव पितरं न जानाति' इत्युक्तो ध्रुवो मात्रे सर्वं यथावृत्तं कथयामास। सुतवचनं निशम्य दुर्मनायमाना दीना सुनीति रवदत् 'पुत्र, सुरुचिः सत्यमेवाह। त्वं स्वल्पभाग्योऽसि। नैव तात त्वयोद्वेगः कार्यः। राजासनं, छत्रं, वराश्वाश्च यस्यान्यजन्मकृतानि पुण्यानि तस्यैव भवन्ति। एवं विचार्य शान्तिं व्रज। सुरुच्याः पुत्र उत्तमः पुण्योपचयसम्पन्नो मम पुत्रस्तु भवानल्पपुण्यः सञ्जातः। तथापि दुःखं कर्तुं नार्हसि। यस्य यावद्भाग्यप्राप्तं तावतैव बुद्धिमान् सन्तोषमेति सुरुच्या वचसा चेदत्यर्थं दुःखितो भवांस्तदा पुण्योपचये यत्नं करोतु। धर्मात्मा, प्राणिहिते रतः सुशीलश्च भव' इति।

ध्रुवः प्रत्यवदत्। अम्ब, मम प्रशमाय यत्त्वयोक्तं तद्दुष्ट वचसा भिन्ने मम हृदये नान्तरं लभते। अहं तथा यतिष्ये यथा निखिलस्य जगतःपूजनीयमुत्तमोत्तमं स्थानंप्राप्स्यामि उत्तमो मम भ्राता पित्रा दत्तं राजासनमाप्नोतु, अहं पुनः स्वकर्मणा शाश्वतं स्थानमिच्छामि। इत्युक्त्वा

ईषत्-किञ्चित्, स्फुरितः-स्पन्दितः अधरः-अधरोष्ठोःयस्य सः (बहुव्री०) अपराध्यति-अपराधं करोति। दुर्मनायमाना-दुःखितचित्ता। भिन्ने-विदीर्णे। अन्तरम्-अवकाशम्,स्थानम्।

मातुर्गृहान्निर्गत्य नगराद्बहिरुपवनं ययौ । तत्र पूर्वागतान् सप्तर्षीन्ददर्श । स राजपुत्रस्तान्सर्वान्प्रणिपत्य प्रश्रयावनतोऽभ्यभाषत । भो ऋषयः, मां सुनीत्यां जातमुत्तानपादतनयं ध्रुवं निर्वेदाद्युष्माकमन्तिकं प्राप्तं निबोधतेति । ऋषय ऊचुः । वत्स, पञ्चवर्षीयो नृपनन्दनस्त्वं नैव च किञ्चिन्निर्वेद कारणं पश्यामः । किंनिमित्तस्ते निर्वेदस्तत्कथ्यतामिति ।

ततो ध्रुवस्तेभ्यः सर्वं शशंस । तन्निशम्य ऋषयः परस्परं प्रोचुः । अहो क्षात्रं परं तजो यद्बालस्यापि हृदयात्सपत्न्या मातुरुक्तं नापसर्पतीति । ते ध्रुवमभाषन्त—भोः क्षत्रिय, निर्वेदाद्यत्त्वयाऽधुना कर्तुं व्यवसितं तदस्मभ्यं कथय । यच्चास्माभिस्तव साहाय्यं कार्यं तदपि ब्रूहीति । ध्रुवोऽब्रवीत् । नाहं धनं राज्यं वेच्छामि । यत्पुराऽन्येन नैव प्राप्तं तदेवैकं स्थानं कामये । कथमेतादृशं स्थानं प्राप्यते तन्मह्यं कथयन्तु भवन्त इति । मरीच्यादयः सप्तर्षय ऊचुः । अनाराधितगोविन्दैर्नरैः श्रेष्ठं स्थानं न प्राप्यते । तस्मादच्युतमाराधयेति । तस्याराधनं मया कथं कर्तव्यमिति ध्रुवेण पृष्टे सप्तर्षय

प्रश्रयावनतः-विनयेन कृतप्रणामः । परम्—उत्कृष्टम् । नापसर्पति-न दूरी भवति । व्यवसितम्-निश्चितम् ।

ऊचुः। अखिलान्बाह्यार्थान् विहाय मनो जगद्धाम्नि विष्णौ निश्चलं कुरु। एवमेकाग्रचित्तेन तन्मयेन त्वया, ओं नमो वासुदेवायेति जप्तव्यमिति।

एतन्निशम्य तानृषीन्प्रणम्य ध्रुवस्तस्मादुपवनान्निर्गत्य यमुनातटे मधुवनं गत्वा तपस्तेपे। तस्य माता सुनीतिस्तस्य पुरतः स्थिता करुणां वाचमुवाच। पुत्र, अस्माच्छरीरव्ययान्निवर्तस्व, दीनां मां परित्यक्तुं नार्हसि। क्व च त्वं पञ्चवर्षीयः क्वचैतद्दारुणं तपः। अयं तेऽध्ययनस्य क्रीडायाश्च कालः।

परं तेन तपश्चर्या न त्यक्ता। महता तपसेश्वर भक्त्या च स परमं पदं प्राप॥

जगद्धाम्नि—जगदाधारे। मधुवनम्—मथुराम्। शरीरव्ययात्—शरीरनाशात्, शरीरनाशहेतोस्तपसः।

श्रीशङ्कराचार्यः

निवृत्तिमार्गमूलकोऽहिंसापरमधर्माधारः प्राणिनां परमोपकारको बौद्धधर्मो बहुशताब्दीव्यापिकालक्रमेणानुयायिनामनयेन परिवर्तमानोऽनेकदोषदूषितस्त्रुटितश्चाभवत् । धर्मरक्षणार्थं बुद्धदेवेन संस्थापितो भिक्षुकाणां सङ्घः प्रथमं पतितावस्थां प्रापत् ।

धर्मरक्षकाश्श्रमणा एव धर्मभक्षका भूत्वा पापपङ्के न्यमज्जन् । परमं धर्ममहिंसामपहाय सर्वविधानि मांसान्यभक्षन् । भिक्षुकाणां विहारा विलासानां विहारास्समपद्यन्त ।

निरीश्वरवादस्तेषां धर्मस्य प्रधानराद्धान्तोऽजायत । सर्वव्यापकसर्वेशैकदेवविश्वासविवर्जिता अपि ते दुर्बलहृदयाः कमपि देवं विना स्थातुमशक्नुवन्तो, बुद्धदेवमेव निजेष्टदेवं मन्यमानास्तस्य प्रतिमाः पूजयन्तः, क्रमेण नानादेवोपासनरता जडद्रव्योपासकाः प्रेतपूजकाश्चाभवन् ।

अहिंसापरमधर्माधारः—अहिंसा एव परमो धर्मस्य आधारः यत्र सः । अनुयायिनाम्—बौद्ध धर्मानुयायिनाम् । अनयेन—अनीत्या, अत्याचारेण । श्रमणाः-बौद्धसंन्यासिनः । निरीश्वरवादः—'ईश्वरो नास्ति' इति सिद्धान्तः । राद्धान्तः—सिद्धान्तः ।

कर्मकाण्डिनां संप्रदायेन साकमेव नानादेवोपासकाः स्वस्य स्वस्याराध्यदेवं सर्वोत्कृष्टं मन्यमानाः, परेष्टदेवताश्च विगर्हमाणाः, परस्परविरुद्धपूजापद्धतीः परिचरन्तः, शैव-शाक्त–पाशुपत–क्षपणक–कापालिक–भैरव–सौर–गाण-पत्यादिनानामतानि सर्वतः प्रासीसरन् । तेषु कौलभैरवादयः कतिपये सम्प्रदाया ब्रह्महत्यासुरापानादिमहापातकान्यपि निजधर्माङ्गत्वेनाङ्गीकृत्य निजानिरययानं विस्तारयामासुः ।

धर्मसङ्कटोऽयं सनातनशङ्करस्य शङ्करीङ्करुणामुदबोधयत् । यथादिसृष्टेस्समये समये पापस्य प्रवृद्धौ महात्मानो महापूरुषा विशिष्टं ज्योतिरादाय संसारेऽस्मिन् प्रादुर्भवन्ति, तथैव जगदुद्धारकश्श्रीशङ्कराचार्योऽपि संसारभूत्यै विशेषं तेजः संधार्य्य धरामिमां स्वजन्मनालश्चकार ।

पुरा किल केरलदेशे पूर्णाभिधाया (सांप्रतंमैलेवोइति-ख्यातायाः) निम्नगायास्तटे श्रीगोविन्दनाथस्य

विगर्हमाणाः—निन्दन्तः । पूजापद्धतीः—पूजनप्रकारान् । परिचरन्तः—सेवमानाः-आश्रयन्तः । प्रासीसरन्—प्रसारयामासुः । निरययानम्—नरकमार्गम् । सनातनशङ्करस्य—नित्यस्य कल्याणकारिणः परमेश्वरस्य । शङ्करीम्—कल्याणकरीम् । भूत्यै—कल्याणाय । पूर्णाभिधायाः—पूर्णानाम्न्याः । निम्नगायाः-नद्याः ।

श्रीवृषाद्रिनाथस्य च मन्दिराभ्यामलङ्कृते कालदीनाम्नि प्राचीनेऽग्रहारे वेदवेदाङ्गपारगः, कर्मठस्सदाचाररतो, धर्मैकप्राणो विद्याधिराजनामा भूसुरः । अभूच्च तस्य शिवगुरुनामा तनयः ।

स च यथाशास्त्रमधीतसाङ्गोपाङ्गवेदाविद्यो गुरोराज्ञया गृहमागतो गुरोः पित्रोश्चाग्रहेणानुरूपां सुलक्षणामार्याम्बा नाम्नीं विदुषीं वधूं परिणिनाय । न लेभाते सर्वगुणालङ्कृतौ सर्वविधसम्पत्समेतावपि दम्पती चिराय सन्ततिम् ।

कुलवधूवरिष्ठार्याम्बा एकत्रिंशदुत्तरषड्विंशतिशततमे युधिष्ठिराब्दे, शुभे मुहूर्ते, भानुवासरे, उदगयने, वैशाखशुक्लपञ्चम्यां, मध्यान्हे, सुलक्षणोपेतं सुतमसूत ।

सुतजन्महर्षितश्शिवगुरुर्नवजाततनयं दृष्ट्वा तस्य शङ्कर इति नाम चक्रे । स शिशुश्शङ्करस्यानुग्रहेण प्रादुर्भूतो

अग्रहारे—ग्रामे । कर्मठः—कर्मशूरः । भूसुरः—ब्राह्मणः । परिणिनाय—विवहति स्म (Married) । लेभाते—लब्धवन्तौ । वरिष्ठा—श्रेष्ठा । एकत्रिंशदुत्तरषड्विंशतिशततमे—२६३१ । युधिष्ठिराब्दे—युधिष्ठिरप्रचारिते संवत्सरे । उदगयने—उत्तरायणे । नवजातम्—नवोत्पन्नम् ।

जनानां शङ्करोऽन्वर्थशङ्करोऽभूत् ।

बालश्शङ्करोऽलौकिकीं प्रतिभां चमत्कारकारिणीं शेमुषीञ्च धारयामास। स प्रथमाब्दपूर्त्यामेवैतादृशं बुद्धिवैभवं प्रदर्शयामास, यत्पिता तृतीय एव वर्षे तं वर्णमालाभ्यासं कारयामास । श्रीशङ्करो बाल्यादेवैकश्रुतिधरो बभूव, स यत्किञ्चिच्छब्दजातमेकदा शुश्राव तदेव श्रुतमात्रं कण्ठाग्रमकरोत् । श्रीचित्सुखाचार्यस्य लेखानुसारं श्रीशङ्करः पञ्चमे वर्षे गुरुणोपनीतो वर्षयुग्माभ्यन्तर एव सव्याकरणं ससाहित्यं सर्वशास्त्रसमूहं सरहस्यं वेदञ्चाधिजगाम । बालश्शङ्करस्सहजप्रतिभया, त्रिलक्षणविद्यया, मधुरस्वभावेन,दयालुहृदयेन च कालटीवास्तव्यानां तत्प्रान्तीयानाञ्च जनानां मनांस्याचकर्ष, तेषां प्रशंसाभाजनञ्च बभूव ।

अनेनैव क्रमेण श्रीशङ्करोऽष्टमे वर्षे सर्वशास्त्राणां पारमगमत् । तस्य कुशाग्रबुद्धिरधीतायाश्श्रुतेः प्रत्येकांशे

अन्वर्थशङ्करः—परमार्थतः जनानां कल्याणकर्ता। अलौकिकीम् (अनोखी)। प्रतिभाम्—नवनवोन्मेषशालिनीं प्रज्ञाम्। शेमुषीम्-बुद्धिम् । एकश्रुतिधरः—एकवारमेव श्रुतमर्थं यः सर्वदा धारयति सः । सहजप्रतिभया-नैसर्गिकप्रज्ञया । वास्तव्यानाम्—निवासिनाम् ।

तेन पश्चात्प्रचारिताद्वैतवादस्याधारभूतं ब्रह्मैक्यसिद्धान्तस्य बीजमनायासं ददर्श ।

दुर्दैवेन तस्य पिता तस्य विद्यासमाप्तिं द्रष्टुं सौभाग्यशाली नासीत् । वर्षीयान् शिवगुरुश्शङ्करस्याष्टमे वर्षारम्भ एवेहलोकलीलया विरराम। दुर्घटनैषा शङ्करस्य सहजां वैराग्यप्रवृत्तिमुद्बोधयामास । स च संसारं त्यक्त्वा तुरीयाश्रमं प्रवेष्टुं मनश्चक्रे ।

परं सर्वसम्मानास्पदस्य पतिवियोगकातराया मातुः प्रीतिपरवशो वर्षं यावत्स्वमनोरथं पूरयितुं न शशाक । संन्यासदीक्षायै मातरं निर्बध्नन्नपि स तस्या अनुमतिं न लेभे ।

अथैकदा श्रीशङ्करो मात्रा सह स्नानार्थं नद्यामवतीर्णो जलचारिणा ग्राहेण पदेऽध्रियत। "हा अम्ब ! विवृतोरुमुखेन बलवता ग्राहेण धृतोऽस्म्येकपदमपि चलितुं न पारये । अपूर्णसंन्यासमनोरथस्यैव पञ्चत्वप्राप्तस्य म आत्मा परलोके शमं नैष्यती'ति सकरुणं मातरमवदत् । माता तस्य तां

अद्वैतवादस्य—'ब्रह्मैवेदं सर्वजगत्, ब्रह्मातिरिक्तं न किमप्यास्ति' इति सिद्धान्तस्य । अनायासम्—आयासः-परिश्रमः। तं विनैव । वर्षीयान्—अतिवृद्धः । तुरीयाश्रमम्—चतुर्थाश्रमं संन्यासम् । दीक्षा--मंत्रग्रहणम् । निर्बध्नन्-आग्रहकुर्वन् । अवतीर्णः-प्रविष्टः । ग्राहः-नक्रः । पारये-समर्थोऽस्मि।

वाचं श्रुतवता, तद्वस्थं पुत्रं पश्यन्ती, तत्प्रतीकारमपश्यन्ती च तत्क्षणमेव तमापत्संन्यासग्रहणायानुमेने । शङ्करश्च संन्यासदीक्षां जग्राह, नक्रश्च तस्य पादं मुमुचे । ततः-संन्यासी भूत्वा नक्रग्राहान्मुक्तस्सलिलादुत्ततार । एवं जलादुत्तीर्णो, मात्रे कृतप्रणामो "ऽम्ब यदा त्वं मां स्मरिष्यसि तदा त्वत्सन्निधौ त्वदाज्ञापरिपालनाय सन्नद्धो भविष्यामी"ति मातरं सान्त्वयन्, श्रीशङ्करोऽल्पे वयस्येव संसारं संन्यस्यन्नपि स्वकर्मक्षेत्रं निजावासग्रामस्य सङ्कीर्णावधेर्विश्वजनीनसमस्तवसुधायां विस्तारयन्, परमपावनं तुरीयाश्रमं प्राविशत् ।

युवा संन्यासी स्वप्रतिज्ञां मात्रे पुनर्निवेद्य कर्मसंन्यासदीक्षायै गुरुमन्वेष्टुमेकाक्येवोदचलत् । मार्गमनुसरन् सागरस्य पश्चिमवेलायां स्थितां गोकर्णनामप्राचीननगरीं प्राप्तः । कालद्यामाचार्यकुलेऽधीयानेन निजपूर्वसतीर्थ्येन विष्णुशर्मणा संगतस्तं चित्सुखनाम्ना स्वशिष्यत्वेना-

---

अनुमेने-अनुमतिं ददौ । उत्ततार-बहिराजगाम । सान्त्वयन्-आश्वासयन् । संन्यस्यन्-त्यजन् । सङ्कीर्णावधेः-स्वल्पसीमातः । विश्वजनीना-सर्वजनहितकारिणी । वेलायाम्-तटे । अधीयानेन-पठता । सतीर्थ्येन-सहपाठिना ।

ङ्गीचकार । एष एव चित्सुखाचार्य एकनवत्युत्तरषड्विंशतिशततमे युधिष्ठिरशके (२६९१ यु०) श्रीद्वारकामठस्य पीठं श्रीब्रह्मस्वरूपाचार्यानन्तरं तृतीयाचार्यत्वेनाधिरुरोह, अशीतिवर्षवयसि च परमपदं प्रपेदे ।

स श्रीशङ्करस्याद्योपान्तचरितस्य साक्षी तस्मात्पञ्चवर्षाधिकवयास्तस्य शिष्यश्चासीत् । बृहदाकारत्वाद्बृहच्छङ्करविजयेति गुरुशंकरविजयेति वा नाम्ना प्रसिद्धे तत्प्रणीते शङ्करचरिते श्रीशंकरस्य सुरेश्वरस्य च समग्राणि चरितानि ताभ्यां कृता विविधा ग्रन्थाश्च वर्णिताः । भाष्याणि तु नाम्नैव निर्दिश्य श्रीशंकरस्य सर्वे लघवो निबन्धास्तेषांनिर्माणावसरानिर्देशपुरःसरमत्र संगृहीताः । ग्रन्थोऽयं 'पूर्वाचार्यसत्पथ', 'शङ्कराचार्यसत्पथ', 'सुरेश्वराचार्यसत्पथे' ति प्रकरणत्रये विभक्तः । एतदुपादेयपुस्तकमद्यावधि मुद्रयित्वा प्रकाशतां न नीतमिति खेदावहम् । तत्कर्ता चित्सुखो वेदान्तभाष्यस्य चित्सुखीति नाम्ना प्रसिद्धस्य विवरणस्यापि प्रणेता प्रतीयते ।

परमपदम्—मोक्षम् । उपादेयम्-संग्रहीतुं योग्यम् । खेदावहम्-खेदजनकम् ।

अनेनैव चित्सुखेन सहोत्तरभारतं परिभ्रमन् श्री-शङ्कराचार्यश्चत्वारिंशदुत्तरषड्विंशतिशततमे युधिष्ठिराब्दे (२६४० यु०) फाल्गुनशुक्लद्वितीयायां नर्मदातटस्थेऽमरकण्टके श्रीगोविन्दयोगिना समगच्छत ।

गोविन्दयोगी पूर्वं गृहस्थाश्रमे चन्द्रशर्मेति चन्द्राचार्येति वा नाम्ना प्रसिद्धो, विख्यातवैयाकरणः, प्राक्प्राच्यदेशाधिवासी, पश्चादुज्जयिन्यां वसन्, चातुर्वर्ण्यस्यैकैकाश्चतस्रो भार्याः परिणीय तासु क्रमशो भर्तृहरि-विक्रमादित्य-भट्टि-वररुचिनाम्नः पुत्रानुत्पादयामास ।

यद्यपि गोविन्दभगवत्पादो निजगुरुश्रीगौडपादाचार्यसमो विद्याविभवेन संपन्नो ग्रन्थप्रणेता च नासीत्, तथापि स श्रीशुकयोगीन्द्रवत्सहजसिद्धो योगीच । तत्प्रणीतं "योगतारावली", "अद्वैतानुभूतिः" "ब्रह्मामृतवर्षिणी"ति ग्रन्थत्रयं प्रसिद्धम् । श्रीशंकरो गोविदयोगिनं सानन्दं स्वसंन्यासदीक्षक्रमाचार्यं वव्रे, श्रीगोविन्दयोगी चातिशयेन मुदा तं स्वसुयोग्यशिष्यत्वेन जग्राह । एवं श्री-

---

समगच्छत—सम्मिलितः । वैयाकरणः—व्याकरणपण्डितः । चातुर्वर्ण्यस्य—चतुर्णांवर्णानाम्—ब्राह्मणक्षत्रियवैश्यशूद्राणां । वव्रे-वृतवान्-स्वीकृतवान् इत्यर्थः ।

चित्सुखाचार्यवर्णनानुसारं श्रीशङ्करो वर्षद्वयं निजाचार्यस्य पावनं चरणारविन्दं सेवमानो वेदान्तस्य तदानीं प्रचलितदर्शनानाञ्च समग्रान् ग्रन्थान् तस्मादधिजगाम ।

गुरोरधीतेषु ग्रन्थेषु श्रीगौडपादाचार्यस्य कारिकाः शङ्करं बलवत्प्रभावयामासुः । तासु वटबीजवृक्षवन्निहितं पश्चान्निजशारीरकभाष्ये प्रपञ्चितमद्वैततत्त्वस्य मूलं प्राप्य स तासां भाष्यनिर्माणाय परमगुर्वनुमतिं प्राप्तुकामस्तं साक्षात्कर्तुमियेष। कामनयानया प्रीतो गोविन्दभगवत्पादश्शंकरं हिमालये श्रीबदरिकाश्रमं वसतो निजगुरोर्गौडपादाचार्यस्य सामीप्यं प्रापयत् । शंकरो ब्रह्मनिष्ठारतं विंशत्युत्तरशतवर्षवर्षीयांसं (१२०) परमगुरुं संवीक्ष्य परमानन्दमविन्दत,चत्वारि वर्षाणि च तस्मात्साक्षाच्छास्त्राण्यध्यैष्ट । तेष्वेव दिवसेष्वेकदा शंकरः परमगुरोः माण्डूक्योपनिषत्कारिकाणां भाष्यरचनायानुमतिं लब्ध्वा प्रस्थानत्रय्या भाष्यस्योपोद्घातरूपं तद्भाष्यं प्रणिनाय । कारिकाभाष्येण सन्तुष्टो गौडपादाचार्यः श्रीशङ्करं प्रस्थानत्रय्यास्तत्समानभाष्यं प्रणेतुं तेन च संसारे वेदान्तदर्शनस्य प्राधान्यं संस्थापयितुमादिदेश । तेष्वेव चतुर्षु

कारिकाः-सूत्ररूपान्श्लोकान्। प्रपञ्चितम्-विस्तृतम्-साक्षात्कर्तुम् द्रष्टुम् । अविन्दत--प्राप्नोत् । अध्यैष्ट -अपाठीत् । प्रस्थानत्रयी--गीता,वेदान्तसूत्रम्, उपनिषदश्च । प्रणेतुम्--निर्मातुम् ।

वर्षेषु श्रीशंकरो वेदान्तप्रस्थानत्रय्याः प्रख्यातषोडशभाष्यनिर्माणेन विलक्षणां प्रतिभामलौकिकं कार्यसाधनसामर्थ्यञ्च प्रदर्शयामास।

ततः श्रीगौडपादाचार्यः श्रीगोविन्दभगवत्पादश्च श्रीशंकरमद्वैतसिद्धान्तप्रचाराय वाराणसीं गन्तुं प्रेरयामासतुस्तस्यां यात्रायाञ्च तमाशीर्भिरयुङ्क्ताम्। तदङ्गीकृत्य चिरमित्रेण नवदीक्षितशिष्येण चित्सुखेन सह शंकरो वाराणसीं प्रस्थातुं प्रस्तुते, तत्सगोत्रोऽग्निशर्मा, कालट्यां वसन्त्या वर्षिष्ठया तन्मात्रार्याम्बया स्वर्णरत्नानि दत्त्वा प्रेषितः, आगतः, शंकराय तान्युपायनीकृत्य, वृद्धाया मातुरसाध्यरोगवृत्तेन तं निराशाहतं चाकितं चाकरोत्। सहसैव स विश्रब्धेनानुचरेण शिष्येण चित्सुखेन सह कालटीमुदचलत्, वृद्धां मातरञ्च द्रष्टुमुत्सुकः पर्वतकाननान्यतिक्रामन् निजजन्मभूमिमवाप। कृशकलेवरातिदुर्बलापि तन्माता प्राङ्गणे परिभ्रमितुं समर्था निजान्तिमे क्षण एकाकिनं पुत्रं दृष्ट्वा परमां मुदमवाप। शंकरोऽपि संन्यासिनां नियमान् न्यक्कृत्य मातरं प्रति भावभक्त्यादरेण तच्चरणौ पस्पर्श,

---

प्रस्तुते-सन्नद्धे। वर्षिष्ठया-अतिवृद्धया। विश्रब्धेन-विश्वासपात्रेण। न्यक्कृत्य-उपेक्ष्य।

पुत्रोचितभक्त्या च तामाशिश्लेष। पुत्रवत्सला माता पुत्रालिङ्गनेनात्मानं सर्वथा रोगनिर्मुक्तं पूर्णप्रसन्नमनुभवन्ती शंकरं तस्य महाकार्ये आशिषा संयोज्य परमानन्देन योगीव तनुमत्यजत्।

केरलीय-प्राचीनब्राह्मणानां प्रथामनुसृत्य निजावास-पृष्ठाङ्गणे चितायां मातुर्देहं ददाह स्वयं शङ्करः। दाहावसरे तेन कृतं मातृस्तुतिनाम पञ्चपद्यमयं लघुकाव्यं वृद्धाया मातुस्तस्यासीमभक्त्याः परमं प्रमाणम्। परमां मातृभक्तिं धारयतश्शंकरस्य कवितामया एत उद्गाराः स्वाभाविका एव।

तदैव सनन्दननामा युवा ब्राह्मणः कालटीमागतः श्रीशङ्कराय बदरिकाश्रमादमरकण्टके नर्मदातटस्थं स्वाश्रमं प्रतिनिवृत्तस्य प्रबलरुजार्तस्य तस्य सम्मान्यगुरोः श्रीगोविन्दभगवत्पादस्य स्वपरलोकप्रयाणात्पूर्वं प्रियशिष्य शङ्करावलोकनोत्कण्ठात्मकं संदेशमुपाहरत्।

शङ्करचरितस्य प्राचीनलेखकौ चित्सुखानन्दगिरी सनन्दनं श्रीलक्ष्मीनरसिंहमन्दिरेण प्रसिद्धाहोबलनगर-

---

प्रथाम्-रीतिम्। उद्गाराः—हृदयभावाः।

निवासिनोर्लक्ष्मीमहादेवनाम्नोर्धनाढ्यधार्मिकदम्पत्योःपुत्रं वर्णयतः। शिववरेण प्राप्तस्य तस्य पितरौ बाल्य एव परलोकपान्थौ बभूवतुः, स च पूर्वमीमांसायाः प्रसिद्धाचार्यस्य प्रभाकरस्य शिष्येण निजमातुलेन दिवाकराध्वरिणा संवार्धितःशिक्षितोऽचिरेणैवलौकिकवैदिकसाहित्ययोः पारंगतोऽनिच्छन्नपि मातुलस्य दुहितुः पाणिं ग्राहितो मातुलस्य मीमांसामतमस्वीकुर्वंश्च नवोढया भार्यया जीवनं सुखविवर्जितमत्यवाहयत्, मातुलेन च कलहायमानस्तस्य गृहं धनञ्च त्यक्त्वाध्यात्मज्ञानार्जनाय सद्गुरुमन्वेष्टुमुदचलत्, श्रीशङ्करस्य च कीर्त्याकृष्टस्तं बादिरकाश्रमस्थं श्रुत्वा तत्स्थानं गतो रुग्णस्य तस्य गुरोर्गोविन्दभगवत्पादस्य नर्मदातटस्थाश्रमयात्रया, श्रीशंकरस्य च पूर्वमेव परलोकप्रयाणप्रस्तुताया मातुस्सकाशं गमनेनोद्विग्नचेते अमरेश्वरं यावद् गोविन्दभगवत्पादमनुसरन् कालट्यां श्रीशंकरमायात्।

तस्योदन्तेन संतुष्टः श्रीशंकरस्तं प्रधानशिष्यत्वे गृहीत्वा, गुरुदर्शनानन्तरं तस्मै संन्यासदीक्षापूर्वकं वेदान्तो-

---

परलोकपान्थौ-परलोकपथिकौ-मृतौ । नवोढया—नव परिणीतया। अत्यवाहयत्-व्यतियापयामास। कलहायमानः—कलहं कुर्वन्। उदन्तेन वृत्तान्तेन।

पदेशं प्रतिशृण्वंस्तेन चित्सुखेन च सहामरेश्वरं प्रस्थितो, मासेन च गुरोराश्रमं प्राप्तो मध्येनर्मदं वैदूर्यपर्वते मान्धातृद्वीपेऽतिवृद्धं गतचेतनं गुरुं गोविन्दभगवत्पादं निजपुत्रेण भर्तृहरिणा मुख्यैरन्यैश्शिष्यैश्चान्वासितं, प्राणोत्क्रमणं प्रतीक्षमाणं ददर्श। प्रियशिष्यशंकरस्य मधुरध्वनिना लब्धचेतनो गोविन्दभगवत्पादस्स्वस्थ इव शय्योत्थितः, प्रेम्णा तं परिष्वजमानोऽद्वैतस्थापनाय भारते वर्षे दिग्विजययात्रामङ्गीकर्तुं तमादिदेश, स्वानशेषान् शिष्यांश्च शंकराज्ञामनुवर्तितुमाज्ञापयामास। अन्तिमे क्षणे दिग्विजययात्रायां शंकरमाशिषा संयोजयन् प्रणवञ्चोच्चारयन् कार्तिकशुक्लपूर्णिमायां वैक्रमाब्दाच्च षट्त्रिंशदुत्तरचतुःशतवर्षपूर्वं (४३६ वि० पू०) योगेन तनुमत्यजत्।

गोविन्दभगवत्पादस्यौर्ध्वदेहिकसमाधिक्रियानन्तरं श्रीशङ्कराचार्यः सनन्दनप्रार्थनया तं काषायप्रदानपूर्वकं संन्यासाश्रमे प्रवेश्य, पद्मपादनामानञ्च कृत्वा, तस्याद्वैततत्वो-

---

प्रतिशृण्वन्–प्रतिजानन्। मध्येनर्मदम्–नर्मदाया मध्ये। अन्वासितम्–अधिष्ठितपार्श्वम्। प्राणोत्क्रमणम्–प्राणनिर्गतिम्–मरणम्।

पदेशार्थमात्मबोधनामकं कवितामयं प्रसिद्धवेदान्तप्रकरणं कृत्वा, तं स्वशिष्यत्वं गतान् गोविन्दभगवत्पादशिष्याँश्चापाठयत् ।

ततः श्रीशङ्कराचार्यः सर्वशिष्यैस्सह दिग्विजययात्रायै प्रतस्थे । सर्वतःप्रथमं स सनातनविद्यापीठं, प्रसिद्धतीर्थराजं प्रयागमागतश्शास्त्रार्थैर्वेदान्ततत्त्वोपदेशैश्च प्रसिद्धिं प्राप्तो नानादेशेभ्यो नवागतानसंख्यान् शिष्यान् प्रस्थानत्रयीभाष्यमध्यापयामास ।

एकदा वेदान्तं प्रचारयन् श्रीशंकराचार्यः सशिष्यः प्रयागाभ्यासे पारेगङ्गं स्थितां चन्द्रवंशिनां प्राचीनराजधानीं प्रतिष्ठानपुरीं तदा श्रीवल्लीनाम्ना प्रसिद्धं द्विजागृहारमगच्छत् । संप्रति स्थानमेतद्वाह्निना भस्मसात्कृतं भग्नावशेषमेलाहाबादस्थाकबरदुर्गसंमुखं गङ्गाया अपर तटे झोंसीनाम्ना विख्यायते ।

पारेगङ्गम्—गङ्गायाः पारम् ।

तत्र तस्य द्विजाग्रहारस्याग्रगण्यकुमारिलभट्टस्य प्रशस्यशिष्यः, पूर्वमीमांसायाः प्रख्यातपक्षपोषकः, प्रथितानुभावः प्रभाकराध्वरी प्रतिवसति स्म। प्रभाकराध्वरी कर्ममीमांसापक्षे स्वस्माद्गुरोरपि व्यशिष्यत। स वैदिकयज्ञादिकर्माकुर्वतस्सर्वान् विगर्हमाणो वेदोक्तकर्मकाण्डमेव सर्वशास्त्रेषु सर्वोपरि कर्तव्यत्वेनोपदिष्टं मेने। निजपक्षं सर्वोपरि मन्यमानः प्रभाकराध्वरी श्रीशंकराचार्यं स्वाग्रहारे सुशोभितं ज्ञात्वा तमपि निजानुयायिनं विधित्सुरसंख्यैरनुयायिभिः प्राप्तस्तस्मै स्वकर्मकाण्डपक्षस्य सर्वप्रधानत्वं निवेदयामास।

शंकराचार्यः शान्त्या तेन विवदमानो मुहूर्तमात्रेणैव तत्पक्षेणैव तं ब्रह्मज्ञानस्य सर्वोत्कृष्टत्वं, मोक्षप्राप्तेश्चरमसाधनत्वं, वेदोक्तकर्मकाण्डस्य च चित्तशुद्धेःपराभक्तेश्चोपायमात्रत्वं, स्वीकारयामास। तस्यानिराकार्यकोटिक्रमेण प्रभाकराध्वरी ससर्वाग्रहारः श्रीशंकरस्यानुयायी समजा-

---

अध्वरी—अग्निहोत्री। व्यशिष्यत—विशिष्टोऽभवत्। विधित्सुः—कर्तुमिच्छुः। विवदमानः—शास्त्रार्थं कुर्वन्। अनिराकार्यकोटिः—अखण्डनीयस्तर्कः।

यत। प्रभाकरो निजपुत्रं पृथ्वीधरमाचार्यचरणारविन्देषु न्यपातयत्, श्रीशंकराचार्यः प्रणिधानेन बालं सहजयोगिनं बाल्यादेव ब्रह्मज्ञानिनं, पित्रा विधीयमानस्य विविधक्रियाकलापस्य परीहारार्थं धृतमूकवृत्तिमवेदीत्। प्रथितप्रभावः शंकरः पाणिना बालं स्पृशन् दृशा तमुद्बोधयन्-

"कस्त्वं शिशो कस्य, कुतोऽसि गन्ता,
किन्नाम ते, त्वं कुत आगतोऽसि ?
एतद्वद त्वं, मम सुप्रसिद्धं,
मत्प्रीतये प्रीतिविवर्धनोऽसि" ॥

इत्यपृच्छत्। बालः पृथ्वीधरश्च तदुत्तरे द्वादशपद्यमयं कमनीयं काव्यमश्रावयत्। तस्याद्यं पद्यमिदम्—

"निमित्तं मनश्चक्षुरादिप्रवृत्तौ,
निरस्ताखिलोपाधिराकाशकल्पः।
रविर्लोकचेष्टानिमित्तं यथा यः,

प्रणिधानेन—योगसमाधिना। सहजयोगिनम्—स्वभावसिद्धयोगनिष्ठम्। परीहारार्थम्—त्यागार्थम्। मूकवृत्तिः—मौनम्। अवेदीत्-अज्ञासीत्। प्रथितः—प्रख्यातः। कमनीयम्—मनोहरम्। निरस्ताखिलोपाधिः—निरस्ता अखिला उपाधयः कर्तृत्वकर्मत्वादयो धर्मा यस्मात् सः। आकाशकल्पः-आकाशसदृशः

स नित्योपलब्धिस्वरूपोऽहमात्मा ॥'

सर्वस्यास्य स्तोत्रस्य सारोऽस्मिन् पद्ये निबद्धोऽस्ति ।

"नाहं मनुष्यो न च देवयक्षो,
न ब्राह्मणः क्षत्रियवैश्यशूद्रः ।
न ब्रह्मचारी न गृही वनस्थो,
भिक्षुश्च नाहं निजबोधरूपः ॥"

हस्तस्थामलकवच्चित्स्वरूपवर्णनेन संतुष्ट आचार्यस्तस्याः पद्यावल्यास्तत्पूणेतुश्च हस्तामलकाख्यामकरोत् । बालस्य पद्यपाठेन संन्यासदीक्षाप्रार्थनया च प्रभावितः प्रभाकरोऽपि श्रीशंकराचार्यं तस्य तुरीयाश्रमप्रवेशमद्वैततत्वोपदेशञ्च प्रार्थयामास । आचार्योऽपि तदङ्गीकृत्य चतुःपञ्चाशदुत्तरषडविंशतिशततमे [२६५४ यु०] यौधिष्ठिराब्द आश्विनशुक्लैकादश्यां तं संन्यासे दीक्षयामास, तत्क्षण एव स्वरचितेन तत्वोपदेशनाम्ना पद्यप्रकरणेन च ब्रह्मज्ञानमुपादिदेश । ततः प्रभृति हस्तामलकः श्रीशंकरस्य प्रधानशिष्योऽद्वैतपक्षस्य च प्रबलसमर्थकः समजायत ।

प्रभाकरस्य श्रीशंकराचार्यपक्षग्रहणेन तदनेडमूकपुत्रस्यं पृथ्वीधरस्य च तदनुग्रहाद्वाग्मितां सिद्धहस्तहस्ता-

---

नित्योपलब्धिस्वरूपः—नित्यज्ञान रूपः। अनेडमूकः-मूकबधिरः।

मलकरूपधारणेन तस्य प्रभावः प्रतापश्च प्रयागे तदभ्यासे च सहसा व्यानशे, सहस्रशो जनाश्च तदनुयायितां प्रपेदिरे। देशिकेश्वरतां गत आचार्यः शिष्याणां सहस्रेण साधुवादेन जयघोषेण च सह भारद्वाजाश्रमं ययौ।

दाक्षिणात्यब्राह्मणः कुमारिलभट्टो यथानियममाचार्यकुलवासेन वेदवेदाङ्गपारं गतो जैमिनेर्वेदोक्तकर्मकाण्डविधायिनीं पूर्वमीमांसां विशेषतोऽभ्यस्य, तस्याः शावरभाष्योपरि टीकाञ्च प्रणीय, देशदेशान्तरे वेदोक्तकर्मकाण्डं प्रचारयन्, सनातनवैदिकपथं, विक्रमात्पूर्वमष्टम्यां शताब्द्यां पार्श्वनाथप्रवर्तितेन पश्चात् षष्ठ्यां शताब्द्यां वर्धमानमहावीरेण पुष्टेन, जैनमतेनाक्रान्तं दृष्ट्वा, जैनान् विजिगीषुरुन्मुमूलयिषुश्च, तन्मतरहस्यानि विजिज्ञासुर्जैनानां विश्वासायात्मानमब्राह्मणं नाटयन्, जैनवेषतो वर्धमान-

---

व्यानशे—वितस्तार। देशिका-अध्यात्मज्ञानप्रचारका [Spiritual teachers] दाक्षिणात्यः—दक्षिण देशवासी। विजिगीषुः—विजेतु मिच्छुः। उन्मुमूलयिषुः—निर्मूलं कर्तुमिच्छु। नाटयन्—दर्शयन्।

महावीरस्य शिष्यतां जग्राह, तदन्तेवासिभिः समं कतिचिद्धायनानि पठन् जैनसिद्धान्तानश्रौषीत् तैस्सह वेदमार्गं दूषयन्नखिलेषु जैनरहस्येषु निष्णातश्चाभवत्। एकदा ब्रह्मद्वेषी वर्धमानमहावीरः शिष्यानध्यापयन् वेदान् विप्रान् यज्ञान् देवांश्चातीवादूषयत्-तद्विजल्पितं वेदविगर्हणं दुराकर्ण्यं समाकर्ण्य विदीर्णमनसः कुमारिलस्याक्षिभ्यां स्थूलमुक्ताफलाकृतयो जलबिंदवो न्यपतन्। तद्दृष्ट्वा तत्सहाध्यायिषु महावीरशिष्येष्वश्रुविपातकारणं पृच्छत्सु कुमारिलः कपटेन "महावीरस्य युक्तयुक्तिश्रवणेनानन्दाश्रूणि विनिर्गतानी" त्युवाच । जैनशिष्यास्तदुक्तावविश्वसन्तस्तं द्विजाग्रं मत्वा गुरवे वृत्तान्तमिमं निवेदितवन्तः कुमारिलं प्रासादात्पातयित्वा बहिश्चक्रुः ।

"यदि वेदाःप्रमाणं स्युर्जीवेय"मिति चेतसि कृत्वा प्रासादात्पतितः कुमारिलो यदीति संशयोक्तेर्गुरुद्रोहाच्चैकस्य नेत्रस्य परिक्षतिं प्राप्याप्यक्षतगात्रस्तस्मात्प्रदेशान्निष्क्रम्य भुवि सर्वत्र जिनवादान् तदुक्ताभिर्युक्तिभिर्दूषयन्

हायनानि—वर्षाणि । जैनरहस्येषु—जैनसिद्धान्तमर्मसु । निष्णातः—निपुणः । दुराकर्ण्यम्—श्रोतुमशक्यम् । परिक्षतिम्—विनाशम् । जिनवादान्—जैनसिद्धान्तान् ।

सौराष्ट्रनृपतेः सुधन्वनो राजसभायां तान् शास्त्रार्थेषु पराजित्य जैनमतं भारतादुन्मूलयामास,स्थिरतरं वेदोक्तकर्मकाण्डञ्च पुनः स्थापयामास। परं कपटाचारेण गुरुद्रोहेणच प्राप्तविद्याया निजविजयेनापि ग्लानिं गतःकुमारिलभट्टस्तुषानले देहपातरूपेण प्रायश्चित्तेनात्मशोधनं विदधे । अन्तसमये श्रीशङ्कराचार्येण संगतो भस्मीभूतार्धाङ्गः कुमारिलभट्टः "कर्मकाण्डज्ञानकाण्डयोः कः श्रेयानि"त्यस्मिन् विषये तस्य शास्त्रार्थपिपासां प्रतिकर्तुमशक्नुवंस्तं कर्ममार्गस्य समानपक्षपोषकमात्मनस्समकक्षं मण्डनमिश्रं वादार्थं गन्तुमादिशन् परलोकपथपान्थो बभूव ।

कुमारिलभट्टस्य स्वसुः पाणिग्राहः कृतविद्यो मण्डनमिश्रः षड्दर्शनीमधीयानेन शिष्यमण्डलेन मण्डितो दासीदाससेवितो विविधसंविधासंवेष्टितो "विद्यालये" ति प्रसिद्धं तद्देशवासिभिस्तु "विजिलबिंदु" रिति नाम्ना ख्यातं स्थानं निवासेनालञ्चकार । श्रीशङ्कराचार्यः पञ्च-

---

तुषानले-तुषाग्नौ (भुस की आगमें)। प्रतिकर्तुम्—शमयितुम्। पाणिग्राहः—पतिः। कृतविद्यः—पण्डितः। संविधा-उपकरणम्।

पादादिशिष्यवृन्दैः परिवृतः कुमारिलभट्टादेशेन तदेव स्थानं प्रति प्रतस्थे। पुरोपकण्ठं प्राप्य मण्डनमिश्रनिकेतनं मार्गयन्नगरान्तरालमुदचलत् । मार्गे कूपोपर्युदकमुद्भ्रन्तीर्दासीर्दृष्ट्वा ता मण्डनपण्डितावासं पप्रच्छ। तासामुत्तराणि श्रीशङ्करदिग्विजये मनोज्ञैः पद्यैर्निबद्धानि सन्ति। तद्यथा—

स्वतः प्रमाणं परतः प्रमाणं-
कीराङ्गना यत्र गिरो गिरन्ति ।
द्वारस्थनीडान्तरसंनिरुद्धा-
अवेहि तन्मण्डनपण्डितौकः ॥१॥
फलप्रदं कर्म फलप्रदोऽजः,
कीराङ्गना यत्र गिरो गिरन्ति ।
द्वारस्थनीडान्तर संनिरुद्धा-
अवेहि तन्मण्डनपण्डितौकः ॥ २ ॥
जगद्ध्रुवं स्याज्जगदध्रुवं स्यात्,

पुरोपकण्ठम्—नगर समीपम् । निकेतनम्—गृहम् । उद्भ्रन्ती:-उद्धरन्ती:। मनोज्ञैः-मनोहरैः। नीडान्तरे-पञ्जरान्तरे (पींजरे में)। ओकः-स्थानम् । अवेहि—जानीहि। अजः-परमेश्वरः । ध्रुवम्—अविनाशि, अध्रुवम्—विनाशि ।

कीराङ्गना यत्र गिरो गिरन्ति ।

द्वारस्थनीडान्तरसंनिरुद्धा-

अवेहि तन्मण्डनपण्डितौकः ॥ २ ॥

इत्यादिकान् सकलशास्त्रसिद्धान्तसारसमायुतान् चमत्कृतिचणान् दासीवचनसमूहान् संश्रुत्य, सविस्मय आचार्यवर्यो विद्यावद्दारकदम्बकमतीत्य, तासामभिज्ञावचनैर्मण्डनमण्डितमभ्रङ्कषं प्रासादमभिज्ञाय, कपाटगुप्तं दुष्प्रवेशश्च लभमानो, योगबलेन गगनमार्गेणान्तःप्रविष्टः, श्राद्धविधिं विदधतो मण्डनमिश्रस्याग्रे तूष्णीं तस्थौ । वेदोक्त क्रियाकलापमेवेतिकर्तव्यं निश्चिन्वानः,कर्मत्यागिनः संन्यासिनश्च सदा तिरस्कुर्वाणः, श्राद्धसमये मुण्डितमस्तकं संन्यासिनमुपलभमानः, कोपकषायितो मण्डनमिश्रोऽरुणनयनेनाचार्यं निपीय कर्कशस्वरेणतीव्रमाचिक्षेप ।

चमत्कृतिचणान्—चमत्कारयुक्तान् । विद्यावद्दारकदम्बकम्—पण्डितस्त्रीसमूहम् । अभिज्ञावचनैः—परिचायकवचनैः । अभ्रङ्कषम्—उच्चतरम् । अभिज्ञाय-परिचित्य । कोपोकषायितः—कोपपरक्तः । अरुणनयनेन—रक्तनेत्रेण । निपीय—दृष्ट्वा ।

इत्थं तौ परस्परपरुषोक्तिपरौ दृष्ट्वा श्राद्धे निमन्त्रिता ब्राह्मणास्तयोः कलहं प्रियवचनैः शमयन्तो "गृहागतस्यातिथिरूपदेवताया अभ्यर्चनं गृहस्थस्य ते धर्म" इति च मण्डनमुपदिदिशुः। मण्डनमिश्रस्तेषामाज्ञां शिरसा वहन्नतिथियतिवर्याय पाद्यार्घ्यपरो बभूव। पाद्यप्राप्तिसमये "भवद्भिस्संवादार्थमागतोऽस्मीति" गुरुर्जगाद। मण्डनमिश्रोऽपि तत् सहर्षं स्वीकृत्यातिथ्यश्राद्धयोरनन्तरं वादो भवितेति प्रतिजज्ञे।

यथाविध्यातिथ्यं पितृकर्म च निर्वर्त्य वादार्थसन्नद्धौ मण्डनमिश्रः श्रीशङ्कराचार्यश्च पणमेवं जगृहतुः। "गृहस्थोऽहमपि यदि पलायितः संन्यासी भवेयमिति" मण्डनमिश्रः, "अहमपि यदि वादे पराजितो गृहस्थो भवामीति" श्रीशङ्कराचार्यश्च प्रतिज्ञातवन्तौ। उभयपक्षग्रहणसमर्थां मण्डनमिश्रपत्नीं 'भारती'ति 'सरसवाणी'ति 'विद्याधरी'ति

परुषोक्तिपरौ—कटुभाषणं कुर्वन्तौ। अभ्यर्चनम्-सत्कारः। पाद्यम्—पादप्रक्षालनार्थं जलम्। अर्घ्यम्-अर्घार्थं जलम्। आतिथ्यम्-अतिथिसत्कारः, श्राद्धम्-पिण्डदानादि पितृकर्म। निर्वर्त्य-सम्पाद्य। पणम्-प्रतिज्ञाम्। पलायितः-विजितः।

'सरस्वती' ति विविधनामभिर्विविधैः कविभिराख्यातां मध्यस्थां विधाय वादे प्रवृताते। यावद्वादोऽभूत्तावत्प्रत्यहं भारती "भिक्षार्थमागच्छे" त्याचार्यं "भोजनार्थ मागच्छे" ति पतिश्चाहूयोभाभ्यां भिक्षाशने अदात्।

एवं वेदादिसर्वविद्यासु वादे क्रियमाणे सप्तमाह्निनात्परं कर्मकाण्डात्मकस्य पतिपक्षस्य स्खालित्यं श्रुत्वा, तस्य पराजयञ्च निश्चित्य, श्रीशङ्कराचार्यस्य ज्ञानकाण्डस्य सर्वश्रेष्ठत्वं स्थापितं मत्वा, महानसात्पतिसमीपं गत्वा विदुषी भारती प्रतिदिनं शङ्कराचार्यमिव मण्डनं किलेदमब्रवीत्— "स्वामिन्नेहि भिक्षायै"। भारत्या भणितिभङ्ग्यानया विदितात्मपराजयो मण्डनमिश्रोऽपि श्रीशङ्कराचार्य चरणारविन्दं नतः, "शरणं देहि" ति ब्रुवाणोऽद्वैततत्वोपदेशपूर्वकं संन्यासदीक्षाप्रार्थनापरो बभूव।

"मामनिर्जित्य कथं मत्पतिर्जितः" इति भाषमाणाया भारत्या मध्य आगमनमाचार्येण सह तस्याः संवादप्रार्थनां, वादे प्रवृत्ते तं प्रति तस्याःकामशास्त्रप्रश्नाँस्तदुत्तरासमर्थत्वात्

प्रवृताते—प्रवृत्तौ। स्खालित्यम्—विचलिताम्—निर्बलत्वमितिभावः। महानसात्-पाकशालयाः। भणितिभङ्ग्या-वचनशैल्या।

कामशास्त्रज्ञानायाचार्यस्य योगबलेन स्वदेहत्यागपूर्वकं मृतामरुकनृपशवप्रवेशं,पुनरुज्जीवितेनामरुकरूपेण कामशास्त्रोपलब्धि, ततस्तेन स्वशरीरे पुनः प्रविश्य कामशास्त्रेऽपि भारत्याः पराजयं, तेन मन्त्रबद्धाया भारत्याश्च शृङ्गपुरमानीय मठे स्थापनमित्यलौकिकीः कथा वर्णयन्ति। श्रीशङ्कराचार्याख्यस्याचार्यचरितस्य लेखको दाक्षिणात्य आर्योपाह्वयः श्रीकृष्णस्वामी गाथयानया मण्डनपराजयस्य तस्य संन्यासग्रहणस्य च पश्चादाचार्यप्रार्थनया भारत्यपि काषायाणि गृहीत्वा संन्यासिनी भूत्वा शृङ्गगिरिमठेऽवसदित्यनुमानं करोति, तत्राद्यापि भारतीपूजायाः प्रचलितत्वात्। यद्भवतु तद्भवतु, विनिश्चितमेतद्यच्छ्रीमच्छङ्कराचार्यो मण्डनमिश्रं पराजित्य तत्प्रार्थनया तं विक्रमात्त्रयस्त्रिंशदुत्तरचतुःशतवर्षपूर्वे (४३३ वि० पू०), चैत्रशुक्लनवम्यां संन्यासेन संदीक्ष्य, सुरेश्वरनामानं कृत्वा, अद्वैतविद्यां सम्यगुपदिश्य, विक्रमात्त्रयस्त्रिंशदुत्तरचतुःशतवर्षपूर्वे (४३३ वि पू०), माघशुक्लसप्तम्यां

शवः—मृतशरीरम्। आर्योपाह्वयः—आर्योपनामकः। काषायाणि—काषायवस्त्राणि (गेरुवे कपड़े)।

द्वारावत्यां शारदामठं संस्थाप्य, तस्मिन् प्रथमपीठाध्यक्ष-मभ्यषिचत् ।

महाराष्ट्रे ब्राह्मणानां मल्लारिसम्प्रदाय आसीत् । माल्लारिणाः श्रुतिमूलकाचारस्य दुर्निर्वहत्वात्त्वमपि सशिष्यः परं मुक्तिकारणमस्मदाचारग्रहणं कुरु, भवद्धारणयोग्यानि वराटकानि दास्याम" इति श्रीशङ्कराचर्यमूचुः। श्रीमदाचार्य एकाद्वितीयसर्वसाक्षिसर्वकारणसर्वव्यापकपरमात्मन एव सर्वोपासनायोग्यत्वं संस्थाप्य, मल्लारिप्रभृतिक्षुद्रदेवतार्चनानर्हत्वं, शुनाश्च निकृष्टजन्तुत्वात् पापरूपत्वाच्च तदीयस्पृष्ट्या स्नानस्य ब्राह्मणानां सिद्धत्वात् तद्वेषचिन्हस्य चाधार्यत्वं, साधयामास । तस्य युक्तिप्रमाणैः पराजित माल्लारिणाः परमगुरुचरणारविंदयोः कृतापराधिन इव किलापतन् । दयारसाभिषिक्ततनुराचार्यस्वामी समीक्ष्य तान् "तिष्ठते"त्युक्त्वा तेषां पापविशोधनं कर्तुमत्यन्तानिपुणानखिलज्ञान् स्वशिष्यान् पद्मपादहस्तामलकप्रमुखाना-

---

अभ्यषिचत्—अभिषिक्तवान् । माल्लारिणाः—मल्लारिमतानुयायिनः।

ज्ञापयामास। ते किल तेषां शिरोमुण्डनं महानद्यां स्नानादिप्रायश्चित्तञ्च कारयित्वा तानद्वैतवादिनो विदधुः।

एवं मल्लारिमतं निराकृत्य श्रीमदाचार्य उज्जयिन्याख्यं पुरमगच्छत्। तत्र तावदुन्मत्तभैरवनामा कश्चित् कापालिकश्चितिभस्मपूर्णकलेवरो, विरचितजटाजूटो, व्याघ्रचर्मरचितकटिसूत्रकौपीनः, कपालयुतवामकरः, "शम्भुभैरव अहो कालीश" इति मुहुर्मुहुर्जल्पन्नाचार्यस्वामिनमिदमब्रवीत्—"स्वामिन्, किं कापालिकमते न्यूनतास्ति, तदन्यत्र किं फलमस्ति, न मे जात्या प्रयोजनं वर्तते, अविवेकस्यैव जातिः कारणं, ब्रह्मादिपिपीलिकान्तर्गतदेहस्य भौतिकत्वात् कस्य जातिर्वक्तव्या, शरीरस्य चर्ममांसास्थ्यादिसप्तधातुमयस्य समत्वेनैव सर्वप्राणिषु वर्तमानस्य विशेषाविशेषत्वं भवद्भिः कल्पितं, भैरवाज्ञया मातृयोनेरुत्पन्नस्य नीचोच्चवृत्तित्वं मन्दा अपि नाङ्गीकुर्वन्ति; अतोऽस्माकं न हि प्रमाणं जातिः, किन्तु जातिद्वयं दृश्यते स्त्रीत्वं पुंस्त्वञ्चेति, तयोर्मध्ये स्त्रीजातिः

निराकृत्य—खण्डयित्वा। चितिभस्म—दग्धशवभस्म। व्याघ्रचर्मरचितकटिसूत्रकौपीनः—व्याघ्रस्य चर्मणा रचितं कटिसूत्रं (करधनी) कौपीनंच (लंगोट) येन सः।

श्रेष्ठा, कथमित्युक्ते, तत्संयोगेनानन्दभैरवनन्दनस्य विद्यमानत्वात्'। तस्य प्रमाणशून्यं जल्पनं श्रुत्वाचार्यवर्यो विविधश्रुतिस्मृतिभिस्तत्पक्षस्यासारत्वं संसाध्य, सदाचारस्य वर्णाश्रमधर्मस्य चावश्यकर्तव्यत्वं संस्थाप्याद्वैततत्वस्योपदेशेन तमपि प्रायश्चित्तपूर्वकं शुद्धं व्यधात्।

एवमेव जैन-बौद्ध-चार्वाक-सौगत-क्षपणकादिविविधानि वेदविरुद्धानि मतमतान्तराणि दक्षिणापथे निराकृत्य तन्मतावलंबिनश्च यज्ञोपवीतधारणपूर्वकं वैदिकधर्मे संप्रवेश्य, निजपरमाचार्याश्रमं बदरिकाश्रमं पुनर्दिदृक्षुरुत्कृष्टभूखण्डमुत्तराखण्डमयात्। तत्रापि वेदविरुद्धमार्गदूषणदत्तदृष्टिः, सत्पथप्रचारपरो, ज्योतिर्मठं विक्रमादष्टाविंशत्युत्तरचतुःशतवर्षपूर्वं (४२८ वि०पू०) समस्थापयदानन्दगिरीति पूर्वनामधारिणं श्रीतोटकाचार्यश्च तदाचार्यश्चक्रे।

ततःसशिष्यो यथापूर्वं दिग्विजयायैन्द्रदिग्भागमुदचलत्। तत्र विविधविद्यापीठेषु राजधानीषु च यात्राङ्कुर्वन् श्रुतिविमुखानाचारान् निरस्यन्, वेदप्रतिपादितांश्च प्रचारयन्नुत्कलानागतः, पुरुषोत्तमक्षेत्रं जगन्नाथपुरीं प्राप्तस्तस्यां वेदान्तगभस्तिप्रसाराय गोवर्धनं मठं विक्रमात्

ऐन्द्रादिग्भागम्—पूर्वदिशम्। निरस्यन्—खण्डयन्।
उत्कलान्—(उड़ीसा देश में)। गभस्तिः—किरणः।

सप्तविंशत्युत्तरचतुःशतवर्षपूर्वं (४२७ वि० पू०) निर्माय, सनन्दनेतिपूर्वनामानं श्रीपद्मपादाचार्यं तस्य प्रधानपदे प्रत्यस्थापयत्।

ततः कामरूपेषु शाक्तं मतं प्रबलं प्राप्य तत्खण्डन उद्युञ्जान, आत्मना पराजितेनाभिनवगुप्तनाम्ना केनचिच्छाक्तमतावलम्बिनाभिचारितो,विषादिग्राहितो वा, भगन्दररोगेणाक्रम्यत। मारकेण रोगेण तेन दैनंदिनं क्षीणकलेवरोऽपि कञ्चित्कालं किञ्चिदुल्लाघः वासवीककुभो प्राचीतः अवाचीं प्रति धर्मराजादिशं निवर्तमानो, दक्षिणापथं प्राप्तः, श्री शृङ्गेरीपुरमाययौ। तत्र शुद्धाद्वैतवैदिकसंप्रदायप्रवर्तनाय, प्रस्थानत्रयीभाष्याणां प्रचाराय च दक्षिणस्यां दिशि हस्तामलकनायकत्वे श्रीशृङ्गपुर्यां शृङ्गगिरिपीठं विक्रमात् षडविंशत्युत्तरचतुःशतवर्षपूर्वं (४२६ वि०पू) समस्थापयत्।

प्रत्यस्थापयत्—प्रतिष्ठापितवान्। कामरूपेषु—कामरूपदेशे शाक्ताः—शक्तेरुपासकाः। उद्युञ्जान:—उद्योगं कुर्वन्। अभिचारितः—कृताभिचारः। अभिचारः—मारणमोहनादि प्रयोगः। विषादि ग्राहितं येन (प्रयोज्यकर्त्रा) सः। दैनं दिनम्—प्रतिदिनम्। नीरोगः—उल्लाघः। प्राचीतः—पूर्वस्य दिशः। अवाचीम्—दक्षिणां दिशम्।

एवं स सर्वत्र वेददुन्दुभिमुद्घोषयन् वेदविगर्हितानि मन्दमतान्युन्मूलयन्, वेदबाह्यान् मुद्राङ्कणादिकदाचारान् कदर्थयन्नागमानुमोदिताचारान् विस्तारयन् सर्वस्मिन् भारते वर्षेऽद्वैतद्युतिं प्रोद्द्योतयन् श्री शंकरभगवत्पादः श्रीकामाक्षीमन्दिरमण्डितं श्रीराजसेनराजधानीं प्रसिद्धविद्यापीठं, काञ्चीनगरमाजगाम। तत्रान्तिमं कामकोटिमठं विक्रमाच्चतुर्विंशत्युत्तरचतुःशतवर्षपूर्वं (४२४ वि० पू०) कॢप्त्वा, स्वयमेव पीठाध्यक्षासनमलङ्कुर्वन्, स्वदेहपातानन्तरञ्च सर्वज्ञसंज्ञं स्वशिष्यं तस्य भाविनमाचार्यं विधाय तत्रैव कञ्चित्कालं स्थितं विक्रमादेकोनविंशत्युत्तरचतुःशतवर्षपूर्वं (४१९ वि० पू०) द्वात्रिंशद्वर्षवयसि (३२) स्वविनश्वरीं तनुं त्यक्त्वा परमपदमवाप।

धार्मिकसंप्रदायानां दर्शनस्य च प्राचीनार्वाचीनेतिवृत्ते शंकरभगवत्पादान्न कोऽप्युच्चतरं स्थानमर्हति, न च कोऽपि माहात्म्ये, शान्तौ, दान्तौ, कुशाग्रमतौ वा तस्य

कदाचारान्-दुराचारान्। कदर्थयन्-विगर्हितान् कुर्वन्।
विनश्वरीम्-विनाशशीलाम्।

समकक्षामवगाहते। कल्मषमलीमसे कलिकाले स एव स्वजीवनेनादित्यब्रह्मचर्यस्यादर्शं दर्शयामास । अभिनव-विषयप्रवेशे, पाण्डित्ये, विचारगाम्भीर्ये, प्रबलतर्कणायां, दर्शनकल्पनायाञ्च तस्य शेमुषी परमोत्कृष्टा। स्वसमये प्रचलितानां विविधसंप्रदायानां दर्शनानाञ्च समाधाने तस्याद्वितीयकौशलमपूर्वविचारशैलीं, प्राचीनप्रमाणवा-क्यानां विभिन्नाशयानां तत्कृतसंगतिं, तत्प्रणीतभाष्याणां वैशद्यं, सारल्यं, प्रगल्भवाक्यविन्यासं, कमनीयत्वमभेद्य-युक्तियुक्तत्वञ्च दर्शंदर्शं तदुत्तरवर्तिनो मनीषिणो, दार्श-निकाः, कोविदाः, समालोचका, विचारकाश्चाश्चर्यचकिता भवन्ति । 'एकस्य बहुषु गवेषण'मिति दर्शनस्य लक्षणं सनातनादायाति,परं 'बहुष्वेकस्यान्वेषण'मिति जटिलप्रश्नो दर्शनस्य, संसारस्य, सदाचारस्य, धर्मस्य, समाजस्य, राजनीतेर्वा दृष्ट्याऽद्वैततत्वं व्याख्याय भगवता शंकर-पादेनैव समुद्घाटितः ।

कल्मषमलीमसे—पापैर्मलिने। आदर्शम्-उदाहरणम्। संगतिम्-व्यवस्थाम्। वैशद्यम्—स्पष्टताम्। सारल्यम्—सरलताम्। प्रगल्भः-प्रौढः। कमनीयत्वम्—मनोहरत्वम्। अभेद्याः—अखण्डनीयाः। दर्शं दर्शम्-दृष्ट्वा दृष्ट्वा। कोविदाः—विज्ञाः, समुद्घाटितः—प्रकटीकृतः।

हरिशर्मकथा

कस्मिंश्चिद्ग्रामे हरिशर्मा नाम दरिद्रो मूर्खश्च विप्र आसीत्। तस्यायमपरो गण्डस्योपरि स्फोटः सम्भूतो यद्-वृत्ति विरहेऽपि बह्वपत्यता । एकदा सकुटुम्बो भिक्षार्थं भ्रमन्कस्मिंश्चिन्नगरे स्थूलदत्ताख्यं महाधनं गृहस्थमाजगाम। स्वपुत्रान्गवादिरक्षकान् विधाय भार्यां च कर्मकरीं सेवकं चात्मानं कृत्वा तस्य गृहे न्यवसत् ।

अथ गच्छति काले स्थूलदत्तस्य सुतायाः परिणयोत्सवो महानागतः। तत्र च महानासीज्जनसंमर्दः। तदा हरिशर्मा मनस्यकरोत् । आकण्ठं घृतमांसं मयाऽधुना लब्धव्यमिति । किन्तु महोत्सवे हरिशर्मा न केनापि स्मृतः। ततोऽनाहारनिर्विण्णो निशि भार्यामब्रवीत् । मम दारिद्र्यान्मौर्ख्याच्चेदृशमगौरवम् । तस्मात्कपटमाचरिष्यामि येनाहमस्य स्थूलदत्तस्य बहुमतो भवेयम् ।

गण्डस्य—गलगण्डस्य (गीलड़ के) । स्फोटः (फोड़ा) । वृत्तिविरहे—जीविकाया अभावे । बह्वपत्यता—बहुपुत्रता । परिणयोत्सवः—विवाहोत्सवः। जनसंमर्दः—मनुजसंबाधः—(भीड़) । निर्विण्णः—दुःखितः। अगौरवम्—अप्रतिष्ठा । बहुमतः—आदरणीयः ।

त्वं चावसरे प्राप्तेऽहं ज्योतिःशास्त्रपारङ्गत इत्यस्मै निवेदयेति ।

एवं तामुक्त्वा सुप्ते जने जामातृवाहनो हयस्तेन स्थूलदत्तगृहाज्जह्रे, दूरे च प्रच्छन्नं स्थापितः । सेवका इतस्ततस्तं विचिन्वन्तोऽपि न लेभिरे । हरिशर्मणो भार्या हयचौरगवेषिणमसकलवित्रस्तं स्थूलदत्तमेत्योवाच । मदीयो भर्ता ज्योतिर्विद्याकोविदः । किमर्थं स न पृच्छ्यत इति । तच्छ्रुत्वा स्थूलदत्तो हरिशर्माणमाह्वयत् । हरिशर्मोवाच—ह्योऽहं विस्मृतोऽद्य हयेऽपहृते स्मृतोऽस्मीति । स्थूलदत्तस्तं सान्त्वपूर्वमुवाच । विस्मृतिं नः क्षमस्व । केनाश्वोऽपहृतस्तन्मः कथयेति । हरिशर्मा ततो मिथ्या रेखाः कुर्वन्नुवाच—इतो दक्षिणसीमान्ते चौरैर्हयः संस्थापितः । यावदसौ चौरैर्दूरं न नीयते तावदानीयतामिति । तच्छ्रुत्वा धावितैर्नरैः सोऽश्वस्तत्क्षणमेवानीतः । सर्वे च हरिशर्मणो विज्ञानं प्रशशंसुः । ततो ज्ञानीति सर्वैः पूज्यमानः स्थूलदत्तगृहे हरिशर्मोवास ।

हयः—अश्वः । जह्रे—हृतः । प्रच्छन्नम्—गुप्तम्—केनाप्यविदितम् । विचिन्वन्तः—अन्वेषणं कुर्वन्तः । गवेषिणम्—अन्वेषिणम् । सान्त्वपूर्वम्—अनुनयपूर्वकम् ।

गच्छत्सु दिवसेषु केनापि चौरेण राजगृहाद्भूरि सुवर्णादि चोरितम्। यदा चौरो नाज्ञायत तदा ज्ञानिप्रसिद्धितो राजा हरिशर्माणमानाययामास। स चानीतःप्रातर्वक्ष्यामीति कालं क्षिपन् राज्ञा वासके सुरक्षितः स्थापितः। तस्मिन्राजकुले काचिच्चेटी जिह्वेति ख्यातासीत्।

तया च भ्रात्रा सार्धं राजगृहाभ्यन्तरात्तत्सुवर्णं चोरितम्। सा रात्रौ वासकं गत्वा हरिशर्मणो ज्ञानाच्छङ्किता द्वारि कर्णं ददौ। हरिशर्मा च तदैकाकी भूत्वा मृषाविज्ञानवादिनीं स्वजिह्वामेवं निनिन्द। दुराचारे जिह्वे, भोगलम्पटया त्वया किमिदमकार्यं कृतम्। अधुना निग्रहं सहस्वेति। तच्छ्रुत्वाऽनेन ज्ञानिनाहं ज्ञातास्मीति भीता सा चेटी युक्त्या तदन्तिकं प्रविश्य तस्य पादयोः पतित्वा तमब्रवीत्। भो ज्ञानिन्! इयं सा जिह्वा या त्वयाऽर्थहारिणीति ज्ञाता। तत्सुवर्णं मयाऽस्यैव मन्दिरस्य पृष्ठतो दाडिमस्याधो भूतले निखातम्। तस्मान्मां रक्ष। यच्च

क्षिपन्—व्यतीतं कुर्वन्। वासके—गृहे। चेटी—दासी। मृषा—मिथ्या। भोगलम्पटया—विषयभोगासक्तया। अकार्यम्—कुष्कर्म। निग्रहम्—दण्डम्। दाडिमस्य—(अनारके पेड़के)। निखातम्—(गाड़ दिया)।

किञ्चिन्मे हस्तगं धनं विद्यते तदपि तुभ्यं ददामीति। एतच्छ्रुत्वा हरिशर्मा सगर्वं तामुवाच । गच्छ दुराचारे, अहं भूतं भव्यं भवत्सर्वं विजानामि । शरणागतां त्वां नोद्घाटयिष्यामि यदि स्वहस्तगतं सर्वं धनं मह्यं दास्यसीति । एवं तेनोक्ता सा चेटी तथेति प्रतिपद्याशु निर्जगाम ।

गतायां तस्यां हरिशर्मा व्यचिन्तयत् । अभिमुखे विधावसाध्योऽप्यर्थो लीलयैव सिध्यति । अनर्थ उपस्थिते महान्मेऽर्थः सिद्धः । स्वजिह्वां यावन्निन्दामि तावन्मम पुरतश्चौरी जिह्वा समागता । प्रच्छन्नपातकिनःशङ्कयैव प्रकाशन्त इति । एवं विचार्य तां रात्रिं निनाय । प्रातश्चोद्याने नृपं नीत्वा निखातं धनं तद्धस्ते समर्पितवान् । चौरश्च कश्चनांशमपनीय पलायित इति शशंस ।

कथं शास्त्रं विना ज्ञानमीदृशं स्यादिति मत्वा तुष्टो राजा तस्मै ग्रामान्दातुमियेष । मन्त्री तु कर्णे राजानमुवाच -देव,

---

प्रतिपद्य—स्वीकृत्य । अभिमुखे-अनुकूले । विधौ—दैवे-भाग्ये वा । लीलयैव—अनायासेनैव । अनर्थे—आपत्तौ । प्रच्छन्नपातकिनः—(छिपे पापी) । अपनीय-हृत्वा । इयेष-इच्छति स्म ।

नूनमयं चौराणां सहायः। तस्मात्सकृदन्यया युक्त्या परीक्ष्य-तामसौ ज्ञानीति । ततोऽन्तःक्षिप्तमण्डूकं सपिधानं नवं घटमानाय्य राजा हरिशर्माणमब्रवीत् । ब्रह्मन्! यदस्मिन् घटे स्थितं तद्यदि भवान्वदति तर्हि सुमहतीं पूजां करिष्यामीति । तच्छ्रुत्वा नाशकालमागतं मत्वा पित्रा बाल्ये क्रीडाकृतं मण्डूक इति स्वनाम स्मृत्वा परिदेवनं कुर्वन्सहसैवमब्रवीत् । मण्डूक! तवावशस्य विनाशायायं घटः सञ्जात इति । तच्छ्रुत्वा महाज्ञानिनाऽनेन भेकोऽपि विदित इति जनास्तं सानन्दं प्रशशंसुः । ततो हरिशर्माणं महाज्ञानिनं मन्यमानो राजा तस्मै बहून् ग्रामान् ददौ । क्षणाच्च स हरिशर्मा सामन्तसन्निभो जज्ञे । इत्थं दैवेन केचिदर्थाः सहसैव साध्यन्ते ।

सकृत्-एक बारम् । सपिधानम्—आच्छादनसहितम् । (ढकने सहित) । अवशस्य-असमर्थस्य—असहायस्य। परिदेवनम्—शोकम्। भेकः-मण्डूकः (मेंढक) । सन्निभः—सदृशः ।

कालिदासराक्षसकथा

कदाचिद्भोजेन विलासार्थं नूतनगृहान्तरं निर्मितम्। तत्र गृहान्तरे गृहप्रवेशात्पूर्वमेकः कश्चिद् ब्रह्मराक्षसः प्रविष्टः। स च रात्रौ तत्र ये वसन्ति तान्भक्षयति। ततो मान्त्रिकान्समाहूय तदुच्चाटनाय राजा यतते स्म। स चागच्छन् मान्त्रिकानेव भक्षयति। किं च स्वयं कवित्वादिकं पूर्वाभ्यस्तमेव पठंस्तिष्ठति। एवं स्थिते तत्रैव रक्षसि राजा 'कथमस्य निवृत्तिः' इति व्यचिन्तयत्। तदा कालिदासः प्राह—'देव, नूनमयं राक्षसः सकलशास्त्रप्रवीणः सुकविश्च भाति। अतस्तमेव तोषयित्वा कार्यं साधयामि। मान्त्रिकास्तिष्ठन्तु। मम मन्त्रं पश्य' इत्युक्त्वा स्वयं तत्र रात्रौ गत्वा शेते स्म। प्रथमयामे ब्रह्मराक्षसः समागतः। स चापूर्वं पुरुषं दृष्ट्वा प्रतियाममेकैकां समस्यां पाणिनिसूत्रमेव पठति। येनोत्तरं तद्धृदयगतं नोक्तम्, 'अयं न ब्राह्मणः अतो हन्तव्यः' इति निश्चित्य हन्ति। तदानीमपि पूर्ववदयमपूर्वः पुरुषः। अतो मया समस्या पठनीया। न चेद्वक्ति सदृशमुत्तरं

मान्त्रिकान्—मन्त्रविद्याविशारदान्। उच्चाटनाय—दूरीकरणाय। यतते स्म—यत्नमकरोत्। प्रतियाम—प्रतिप्रहरम्।

तस्यास्तदा हन्तव्य इति बुद्ध्या पठति—

'सर्वस्य द्वे'

इति। तदा कालिदासः प्राह—

'सुमतिकुमती संपदापत्तिहेतू'

इति। ततः स गतः। पुनरपि द्वितीययामे समागत्य पठति-

'वृद्धो यूना'

इति। तदा कविराह—

'सह परिचयात्त्यज्यते कामिनीभिः'।

इति। तृतीययामे स राक्षसः पुनः समागत्य पठति—

'एको गोत्रे'

इति। ततः कविराह—

'प्रभवति पुमान्यः कुटुम्बं बिभर्ति'

इति। ततश्चतुर्थयाम आगत्य स राक्षसः पठति—

स्त्री 'पुंवच्च'

इति। ततः कविराह—

'प्रभवति यदा तद्धि गेहं विनष्टम्'।

इति। ततः स राक्षसो यामचतुष्टयेऽपि स्वाभिप्रायमेव ज्ञात्वा तुष्टः प्रभातसमये समागत्य तमाश्लिष्य प्राह—

कामिनीभिः—स्त्रीभिः। गोत्रे—वंशे। बिभर्ति—पालयति।

'सुमते, तुष्टोऽस्मि । किं तवाभीष्टम्' इति । कालिदासः 'त्वमस्मद्गृहान्निस्सर' इत्याह । सोऽपि 'तथा' इति गतः अनन्तरं तुष्टो भोजः कविं बहु मानितवान् ।

चरमश्लोकः

ततः कदाचिद्भोजराजः कालिदासं प्रति प्राह - 'सुकवे, त्वमस्माकं चरमग्रन्थं पठ' ततः क्रुद्धो राजानं विनिन्द्य कालिदासः क्षणेन तं देशं त्यक्त्वा एकशिलानगरं प्राप । ततः कालिदासवियोगेन शोकाकुलस्तं कालिदासं मृगयितुं राजा कापालिकवेषं धृत्वा क्रमेणैकशिलानगरं प्राप । ततः कालिदासो योगिनं दृष्ट्वा तं सामपूर्वं पप्रच्छ—योगिन्! कुत्र तेऽस्थितिः' इति । योगी वदति—' सुकवे, अस्माकं धारानगरं वसतिः ' इति । ततः कविराह—' तत्र भोजः कुशली किम् । ' ततो योगी प्राह-' किं मया वक्तव्यम्' इति । ततः कविराह—तत्रातिशयवार्तास्ति चेत्सत्यं कथय'

चरमः—अन्तिमः । मृगयितुम्—अन्वेष्टुम् । सामपूर्वम्—शान्तवचनं पुरस्सरम् । वसतिः—निवासः ।

इति। तदा योगी प्राह–'भोजो दिवं गतः' इति। ततः कविर्भूमौ निपत्य प्रलपति–'देव त्वां विनास्माकं क्षणमपि भूमौ न स्थितिः। अतस्त्वत्समीपमहमागच्छामि, इति कालिदासो बहुशो विलप्य चरमश्लोकं कृतवान्–

'अद्य धारा निराधारा निरालम्बा सरस्वती।

पण्डिताः खण्डिताः सर्वे भोजराजे दिवं गते ॥१॥

एवं यदा कविना चरमश्लोक उक्तस्तदैव स योगी भूतले विसंज्ञः पपात। ततः कालिदासस्तथाविधं तमवलोक्य अयं भोज एव, इति निश्चित्य 'अहह महाराज, तत्रभवताहं वञ्चितोऽस्मि' इत्यभिधाय झटिति तं श्लोकं प्रकारान्तरेण पपाठ–

'अद्य धारा सदाधारा सदालम्बा सरस्वती।

पण्डिताः मण्डिताः सर्वे भोजराजे भुवि स्थिते ॥२॥

ततो भोजस्तमालिङ्ग्य प्रणम्य धारानगरं प्रति ययौ ॥

निरालम्बा—निराश्रया। विसंज्ञा—मूर्छितः।

एकलव्यकथा

अर्जुनस्य धनुर्वेदे परमं प्रावीण्यं वीक्ष्याचार्यो द्रोणः परां प्रीतिं गतस्तमुवाच । प्रयतिष्ये तथा कर्तुं यथा नान्यो धनुर्धरस्त्वत्समो लोके भविता, सत्यमेतद् ब्रवीमीति । द्रोणस्य कौशलं श्रुत्वा धनुर्वेदजिघृक्षवो राजानो राजपुत्राश्च सहस्रशः समाजग्मुः । ततो निषादराजस्य हिरण्यधनुषः सुत एकलव्यो द्रोणमभ्याजगाम । निषादोऽयमिति मत्वा द्रोणोऽर्जुनादीनामवेक्षया तमेकलव्यं नैव प्रातिजग्राह, द्रोण उवाच-एकलव्य, मम शिष्योऽसि, शरप्रयोगे च बलवत्तरः । गृहानेव निवर्तस्वेति । एवमुक्त एकलव्यो द्रोणस्य पादौ शिरसि कृत्वा वनमनुसम्प्राप्य द्रोणस्य मृण्मयीं प्रतिमां व्यदधात्, तस्यां चाचार्यवृत्तिमकल्पयत् ।

प्रावीण्यम्-दक्षताम् । प्रयतिष्ये-प्रयत्नं-करिष्यामि । धनुर्वेदजिघृक्षवः—धनुर्विद्यां पठितुमिच्छन्तः । अर्जुनादीनामवेक्षया—अर्जुनादीन्-राजपुत्रान् अवेक्ष्य ' नैते राजपुत्रा निषादजातिजमेनं स्वसहपाठिनमनुमंस्यन्ते ' इति मनसिकृत्य । प्रतिजग्राह—स्वीचकार । आचार्यवृत्तिम्-आचार्ये यादृशीवृत्तिः—प्रणामादिव्यवहार उचितः ताम् ।

तां मूर्तिं सदैव पूजयित्वा परया श्रद्धयोपेतो विमोक्षादान-सन्धाने परं लघुत्वमाप ।

एकदा द्रोणेनाभ्यनुज्ञाताः कौरवपाण्डवा मृगयां कर्तुं निर्गताः। कश्चित् पुरुषः श्वानमादाय पाण्डवाननुजगाम। स श्वा चरान्वितस्ततो मलदिग्धाङ्गं कृष्णाजिनजटाधरमेकलव्यं समालक्ष्य तदन्तिके भषंस्तस्थौ । तदा भषतस्तस्य शुनो मुखे स्वस्यास्त्रविद्यायां लाघवं दर्शयन् सप्त शरान् युगपद् मुमोच । स श्वा शरपूर्णास्यः पाण्डवाना-जगाम । तं दृष्ट्वा परं विस्मयमपन्नास्ते वनेऽन्विष्याऽनिशं शरानस्यन्तमेकलव्यं ददृशुः । विकृतदर्शनं तं नाभ्यजा-नन्को भवानिति च पर्यपृच्छन्। एकलव्य उवाच। निषादाधिपतेः सुतं धनुर्वेदकृतश्रमं द्रोणशिष्यं मां वित्तेति।

परया-उत्कृष्टया। विमोक्षः-बाणमोचनम्। आदानम्-तूणीराद्-बाणग्रहणम्, संधानम्—धनुर्गुणेन बाणस्य योजनम्। लघुत्वम्-क्षिप्रकारिताम्-हस्तलाघवम्। कृष्णाजिनम्-कृष्ण मृगस्य चर्मदिग्धम्-व्याप्तम्। भषन्-बुक्कन् (भौंकता हुआ) अस्यन्तम्—क्षिपन्तम्। विकृतदर्शनम्—विकृताकारम अभ्यजानन्-पर्यचिन्वन्। वित्त—जानीत।

पाण्डवा वने वृत्तं सर्वं द्रोणायाचख्युः । अर्जुनस्तु रहो द्रोणं समासाद्य प्रणयादब्रवीत् । अहं भवता पूर्वमुक्तो न मे शिष्यस्त्वद्विशिष्टो भविष्यतीति । अथ कस्मान्मद्विशिष्टो लोकादपि च बलीयान्निषादाधिपतेः सुतो भवतः शिष्योऽस्तीति ।

द्रोणो मुहूर्तं चिन्तयित्वाऽर्जुनमादायैकलव्यं गतः । जटिलं चीरवाससं धनुष्पाणिमनिशं शरानस्यन्तमेकलव्यं ददर्श । एकलव्यस्तु द्रोणमायान्तमवलोक्य प्रत्युद्गम्य शिरसा प्रणम्यात्मानं शिष्यं निवेद्य द्रोणस्याग्रतः प्राञ्जलिस्तस्थौ । द्रोण एकलव्यमुवाच । यदि मे शिष्योऽसि गुरुदक्षिणा दीयतामिति । एकलव्यः प्रत्यवदत्-किं प्रयच्छामि । भवानाज्ञापयतु । न हि किञ्चिद् गुरवेऽदेयं ममेति । द्रोणस्तमब्रवीत् । दक्षिणोऽङ्गुष्ठो दीयतामिति । द्रोणस्य दारुणवचः श्रुत्वाऽऽत्मनः प्रतिज्ञां रक्षन्सत्यवादी निषादाधिपतेः सुतोऽदीनमानसोऽङ्गुष्ठं छित्वा द्रोणाय प्राददात् । ततो शरमेकलव्योऽङ्गुलीभिरेव व्यकर्षत् । न च तथा शीघ्रोऽभवद्यथा पूर्वमासीत्

जटिलम्—जटाधारिणम् । चीरवाससम्—जीर्णवस्त्रधारिणम् (चीथड़े पहने हुए) । प्रत्युद्गम्य—स्वागतं कर्तुं त्राद्वित्रपदान्यग्रे चलित्वा । निवेद्य-बोधयित्वा । प्राञ्जलिः-बद्धाञ्जलिः ।

कादम्बरी कथाया भूमिका

आसीद्वेत्रवतीतटे विदिशा नाम काचित्पुरी मण्डनं भूमण्डलस्य पुरुहूतपुरस्पर्धिविभवा । तस्यां निजभुजवीर्यविजितसकलारातिमण्डल आखण्डल इव श्रीमान्राजा शूद्रकोऽभवत् । तस्यानन्यलभ्यानां सुखानां पारदृश्वनो यूनोऽपि विषयपराङ्मुखं मनो बभूव । अथैकदा प्रतीहारी विनयावनम्रा व्यजिज्ञपत् । देव काचिच्चण्डालकन्यकाऽऽश्चर्यावहं शुकमादाय देवदर्शनलालसा तमुपायनीकर्तुं देवपादमूलमागता । श्रुत्वा देवः प्रमाणमिति । क्षणं विमृश्य मन्त्रिणां मुखमालोक्य को दोषः, प्रविशत्विति समादिदेश । राज्ञानुज्ञाता सा चण्डालकन्यका सह केनापि हस्तस्थसशुकस्वर्णपञ्जरेण चण्डालस्थविरेण नृपाङ्गणं प्रविवेश । तस्यास्तदद्भुतं रूपं विलोक्य नृपतिः परं विस्मयं ययौ । सा च प्रविश्य महीपालमनाकुलेन चक्षुषा वीक्ष्य प्रगल्भवनितेव प्रणनाम । ततः प्रणतकन्धरः स्थविरोऽब्रवीत् । अयं वैशम्पायननामा शुकोऽद्भुतं रत्नम् ।

पुरुहूतपुरम्—इन्द्रनगरम्—अमरावती । आखण्डलः—इन्द्रः । पारदृश्वनः—पारदर्शिनः । प्रतीहारी–द्वाररक्षिका । स्थविरः–वृद्धः ।

सकलभुवनतलरत्नानां चोदधिरिवैकभाजनं देवः । इति स्वामिदुहित्राऽयं शुक आदरेणोपाहृतः । विहगं परिगृह्य प्रसादः क्रियतामिति । एवमुक्त्वा राज्ञोऽग्रतो मणिकुट्टिमे पञ्जरं विनिधाय तं प्रणम्य सप्रश्रयमपासरत् स्थविरः । प्रतीहार्या विवृतद्वारसम्पुटात्पञ्जराद्विहङ्गमो निर्ययौ । स दक्षिणं पादमुत्क्षिप्य जयशब्दमुदीर्य च प्रयुक्तवेदमन्त्राशीरिमामार्यामपठत् ।

स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥

इति । तामाकर्ण्य विस्मयोत्फुल्ललोचनो महीपालः कुमारपालनामानं मुख्यसचिवमब्रवीत् । ईदृशमाश्चर्यं भवद्भिः कुत्रापि दृष्टं श्रुतं वेति । अमात्य उवाच । देव, पूर्वसंस्कारोपजनिता एतादृशा अतिशया प्राणिनां भवन्त्येव । कोऽत्र विस्मय इति । एवमुक्तवति सचिवे तारगम्भीरो मध्याह्नपटहध्वनिरुदभूत् । अस्याश्चण्डालकन्यकायाः सुखायावसथादिकं बहिः प्रकल्प्यतामयं च

उपाहृतः—आनीतः । मणिकुट्टिमे—मणिरचितबद्धभूमौ । सप्रश्रयम्—सविनयम् । अतिशयाः—विशेषाः । तारः—तीव्रः । आवसथादिकम्—निवासादिकम् ।

विहङ्गमवरोऽभ्यन्तरं प्रवेश्यतामिति प्रतीहारीमादिश्य सेवार्थमागतं राजन्यचक्रं विसृज्य राजा सभामौज्झत् । ततः कृताल्पव्यायामः स्नात्वा देवपूजां विधाय भुक्त्वा च शय्यागृहं ययौ । पर्यङ्के मुहूर्तमात्रं स्थित्वा शुकमन्तःपुरविश्रान्तं कञ्चुकिनाऽऽनाययामास । कच्चिद्भवताऽऽस्वादितोऽभिमतआहार इत्युक्त्वा कौतुकाक्षिप्तहृदयः पप्रच्छ । वैशम्पायन, को नु त्वं, क्व जातः, कुत इदं ते शास्त्रपाटवं, केन वा भवतो विप्रजनोचितं नाम कृतं, कथं ते चण्डालजनसम्पर्कोऽभूत्कथं वेहागम इत्यात्मनो वृत्तं कार्त्स्न्येन वक्तुमर्हसीति । एवं क्षितिपेन सबहुमानं पृष्टः शुक आत्मवृत्तान्तं वक्तुं प्रचक्रमे ।

देव, भवतः श्रुतिपथमागतैव विन्ध्याटवी, यदेकदेशे कण्डूलगण्डेभदलितद्रुमे दण्डकारण्ये ससीतौ रामलक्ष्मणावुषितौ । यत्र चागस्त्यमुनेः पावनमाश्रमपदं वर्तते । यस्योपकण्ठे पुण्यसलिलं पम्पाख्यं सरोऽस्ति । तस्य पश्चिमे तीरे जीर्णः शाल्मलिपादप आरोहपरिणाहाभ्यां व्याप्तव्योमदिगन्तरो वर्तते । तस्मिन् कृतकुलायानि विहङ्गमसह-

---

औज्झत्—तत्याज । कण्डूलम्-खर्जुयुक्तम् । इभः—हस्ती । आरोहपरिणाहाभ्याम्—उच्चताविस्ताराभ्याम् । व्योम-आकाशम् । कुलाय :—नीडः (घोंसला) ।

स्राणि निवसन्ति। दिवा यत्र कुत्रापि प्राणयात्रां निर्वर्त्य रात्रौ स्वनीडेषु सुखं शेरते। तस्मिन्नेव वृक्षे जायया सह वर्तमानस्य परिणतवयसः पितुरहमेवैकः सूनुरभवम्। तीव्रां प्रसववेदनां सोढुमसमर्था मदीया जननी पञ्चत्वं गता। मत्तातो जायावियोगदग्धोऽपि पुत्रस्य कृते शोकमुत्सृज्य मत्प्राणधारणे सयत्नो बभूव। प्रेम्णाऽऽत्मनः प्राणवृत्तयेऽपि बहिर्गन्तुं न मतिं चक्रे। मां वक्षसि निधाय दिवानिशं नीड एवास्त। अतिक्रामति काले, किञ्चिदुद्भिन्नपक्षतौ मयि सम्भ्रान्तमृगपक्षिकुलश्रुतः कलकलस्तस्मिन्नरण्येऽकस्मादेव समुद्भूतः। ततस्तातस्योरसः शिरोधरां किञ्चिदुन्नमय्य कुतूहलवशाच्चतुर्दिक्षु निक्षिप्तवानहम्। असंख्यातकिरातपरिवारितं शवरसेनान्यं मृगयारसादायान्तमपश्यम्। स सेनापतिर्मृगयाजनितश्रमः पम्पासरस्तीरे शाद्वले क्षणं विश्रम्य पीत्वाऽपः बालमृणालिकाः प्राश्य पुलिन्दैः सहाभिमतं देशं जगाम। एको जरत्पु-

---

प्राणयात्राम्—भोजनम्। निर्वर्त्य—कृत्वा। पक्षतिः—पक्षमूलम् (Wings)। शिरोधराम्—ग्रीवाम्। किराताः—भिल्लाः। शवरसेनान्यम्—भिल्लानां सेनापतिम्। शाद्वले—हरिततृणाच्छादिते भूभागे (green) प्राश्य-भुक्त्वा। पुलिन्दैः—

लिन्दस्त्वाजातपिशितलाभो विलम्ब्य शाल्मलौ दृष्टिं चिक्षेप। तस्य दुरारोहस्य तरोरारोहणे यत्नं कृत्वा नीडनिवासिनः शुकान्हत्वा भूमावपातयत्। क्रमेण स दुराचारस्तातस्यापि शिरोधरां बभञ्ज। विगतजीवितं तातं चाधोऽक्षिपत्। तदा मम चेतसि न शोको नान्यद्वा किञ्चिदासीदेकं सहजातं भयं विहाय। ततोऽहं पितुरुत्सङ्गाद्विनिर्गत्य शीर्णानां पर्णानां राशिं तूर्णमाविशम्। स पापोऽपि शाल्मलेरवरुह्य मूलवर्तिनो गतासूञ् शुकानादायागच्छत्। अहं विधिवशाज्जीर्णपर्णसमानवर्णत्वात्तेन नालक्षितः। तस्मिन्दूरमातिक्रान्ते मां पिपासा पर्यबाधत। उड्डयनसामर्थ्याभावात्पद्भ्यामेव यथाकथंचित्पम्पातीरं गन्तुमैच्छम्। तमेव पापपुलिन्दं पदे पदे शङ्कमान इतस्ततोऽनभ्यासात्पतन्हा तातेति शोचन्कण्ठान्तर्वर्तिभिः प्राणैरायास्यमानोऽहमतिष्ठम्। तस्मात्सरसो नातिदूरे तपसां निधेर्जाबालेर्नाम मुनेराश्रमोऽस्ति। तस्य सुतो हारीतनामा तस्मिन्सरसि स्नातुमागतो मां तदवस्थं विलोक्य जातदयः केनापि पापेन कुलायाच्छुकः पातित इत्युक्त्वा मां करेऽगृह्णात् कतिचिच्च पयोबिन्दूनपाययत्।

शबरैः। पिशितम्—मांसम्। सहजातम्—स्वाभाविकम्।

कृताह्निकश्च हारीतो मां पितुराश्रममनयत् । तत्र भगवन्तं जाबालिं महात्मभिस्तपोधनैः परिवृतं जराधवलितमूर्धानं तेजसा ज्वलन्तं साक्षादिव पितामहमद्राक्षम् । स त्रिकालदर्शी भगवान्मां क्षणं वीक्ष्य स्मयमान इवाब्रवीत् । स्वस्यैवाविनयस्य फलमनेनानुभूयत इति ।

—o—

चन्द्रापीडवैशम्पायनयोर्जन्मबाल्यकथा

अथावन्तिषु गुणसम्पदां निधिर्विभूतिनिर्जितलङ्कालकामरावती नगर्युज्जयिनी नाम । तस्यां भरतभगीरथोपमस्तारापीड इति पृथिवीपतिर्बभूव । तस्यामात्यः प्रज्ञाविभवविहसितदेवगुरुः शुकनासो नाम ब्राह्मण आसीत् । स राजा नाम्नैव निर्भिन्नसकलारातिकुल एकविक्रमाक्रान्तभुवनतलो जहासेव वासुदेवं विक्रमत्रयाक्रान्तभुवनम् । तस्मिन्प्रज्ञाशालिनि मन्त्रिणि राज्यभारं चिक्षेप । समग्राणि सुखान्युपभुञ्जानोऽपि सुतमुखालोकनसमुद्भवमेवैकं सुखं नान्वभवत् । यथा यथा कालेनास्य नवं वयो व्यतीयाय तथा तथा निरपत्यतया शोकोऽवर्धत ।

कृताह्निकः—विहितसंध्यावन्दनादिः । अलका—कुबेरपुरी । देवगुरुः—बृहस्पतिः ।

अन्तःपुरकदम्बके तस्य मुख्या राज्ञी विलासवती नामासीत्। सा भर्तुरनुज्ञया गौरीमर्चयितुं देवतायतनमगच्छत्। तत्र च पुराणे वाच्यमानेऽपुत्रस्य कुतो लोकाः शुभा इति शुश्राव। तच्छ्रुत्वा कामपि वेदनां गता। स्वभवनं निवृत्ता वस्त्रेण मुखमावृत्य भूमावुपविष्टा रुरोद। सखीभिः प्रार्थ्यमानापि नाकरोदाहारं नापि विरराम रोदनात्। परिजनात्तस्या अवस्थां निशम्य राजा तां सान्त्वयन्नाह स्म। प्रिये किमिदमारब्धं त्वया, किमकारणं रुद्यत इति। यदा सा किञ्चिन्नोवाच तदा नृपतिः सखीभिः परिगृहीतार्थः कृतः। राजापि ततः शोकपरायणो बभूव। महिषीं सान्त्वयन्राजा सगद्गदं जगाद। देवि, इयमेव चिन्ता मामपि सुचिरं दुनोति। महदपि राज्यं न मे सौख्यमावहति। विफलं मम जीवितम्। न खलु वयमनुग्राह्या देवतानाम्। कुतोऽस्माकमियती भाग्यसम्पद्यत् तवोत्सङ्गं पुत्रपूर्णं द्रक्ष्याम इति। एवं बाष्पाकुललोचने राज्ञि विलपति शुकनासो वार्तां श्रुत्वा सत्वरमाययौ। तस्यापि गृहिणी रोदिति स्मानपत्यतया। किं तु स्वामिदुःखापनयनाय धीरमभ्यधात्। क्व धीरप्रकृतिर्देवः, क्वेयं विक्लवचित्तता। भवादृशां हृदये शोको नैव पदं लभते। आधीयतां धैर्ये

परिगृहीतार्थः—ज्ञातार्थः।

धर्मे च धीः। धर्ममूलं हि सर्वम्। विप्रेभ्यो वसु दीयताम्, देवताःपूज्यन्ताम्। वापीकूतपडागादीनि खन्यन्तामिति। इदं शुकनासवचः श्रुत्वा विगतशोकौ तौ दम्पती स्वाः क्रिया निर्वर्तयामासतुः शुकनासोक्तं यथावदन्वतिष्ठद्राजा। एकदा राजा स्वप्ने विलासवत्या वदनं प्रविशन्तं निशाकरमद्राक्षीत्। शुकनासश्च स्वगृहिणीं मनोरमां सपुण्डरीकाङ्कां व्यलोकयत्। अन्येद्युरुदिते भानुमण्डले तं स्वप्नं राजा शुकनासाय शशंस। सोऽभिदधे। देव सम्पन्नास्ते मनोरथाः। पूर्णेन्दुसुन्दरं पुत्रमाचिरादेव देवी सोष्यत इति। केषुचिद्दिनेष्वतीतेषु विलासवती गर्भमधत्त। दशमे मासि शुभायां वेलायां देवी सुतमसूत। राजा शुकनासेन सहौत्सुक्यात्सूतिकावासं गत्वा तत्र नयनानन्दकरं कुमारमुदयरागार्द्रं नवामिन्दोर्बिम्बमिव ददर्श। अत्रान्तरे मन्त्रिगृहादागत्य द्वाररक्षकः शुकनासगृहे पुत्रजन्मोत्सवमकथयत्। तच्छ्रुत्वा प्रमोदनिर्भरो महीपतिः शुकनासमालिङ्ग्य तस्योत्तरीयं पूर्णपात्रमिति स्वयं जग्राहोवाच च। पश्येदं विधेरानुकूल्यं यत्सुखस्योपरि सुखमपरं विहित-

---

सोष्यते—उत्पादयिष्यति। पूर्णपात्रम्—हर्षप्रेम्णोश्चिन्हम्।

मिति । ततोऽनपेक्षितनीचोच्चव्यवहारोऽनवरतवादित-तूर्यादिमङ्गलवाद्यो महोत्सवः प्रववृते । जातकर्मादौ कृते विलासवत्यां स्नातायां प्रशस्तेऽहनि महीपतिः स्नात्वा द्विजोत्तमान्सुवर्णलक्षेण पूजयित्वा परिजने भूषणानि वासांसि च वर्षन् दैवज्ञैरनुज्ञातो बालस्य स्वप्नसदृशं चन्द्रापीड इति नाम निर्ममे । शुकनासोऽपि स्वसुतस्य द्विजजनोचितं वैशम्पायन इति नाम चक्रे । चन्द्रापीडः क्रमेणालक्ष्यदन्तमुकुलाननेनाव्यक्तवर्णैरालापैश्च पित्रोर्मनो जहार । समाप्तप्राये षष्ठे वर्षे राजा चन्द्रापीडस्य कृते नगराद्बहिर्विद्यागृहमकारयत्तत्र च तं विद्याधिगमाय निवेश्य धनुर्वेदविशारदान्दण्डनीत्यादिनिपुणानाचार्यान्पर्यकल्पयत् । शुकनासोऽपि यथाविधि पुत्रमुपनीय राजपुत्रानुगं चक्रे । गुरुकुले स्थितं पुत्रं द्रष्टुं राजा तारापीडः सह देव्या वारंवारमगच्छत् । देव्या विलासवत्या प्रार्थ्यमानोऽपि तं स्वगृहं कदापि नैवानाययत् । पूर्णे षोडशे वर्षे कुशाग्रधी राजपुत्रः सर्वशास्त्रार्थतत्त्वज्ञोऽनेक-भाषाकोविदः सकलकलानिपुणो व्यायामसेवनेन च प्राप्तसर्वाङ्गसौष्ठवः प्रलम्बबाहुः पीनांसः पृथुवक्षास्तनूदरः सञ्जातः ।

पर्यकल्पयत्–न्ययूयुजत् । पीनांसः–स्थूलस्कन्धः ।

शुकनाससुतस्तस्य प्रतिबिम्बमिवाभवद्विभा महाप्रमाणशरीरम् । राजा पुत्रं कृतविद्यं बुद्ध्वा गुरुवेश्मन आनेतुमुपचक्रमे । वाहिनीपतिं बलाहकनामानं राजपुत्रसहस्रपरिवृतं शुभगुणातिशयितोच्चैःश्रवस्केनेन्द्रायुधनाम्ना वाजिनोपेतं प्राहिणोत् । बलाहको विद्यागृहं गत्वा राजपुत्रं सादरं प्रणम्य राजाज्ञामुक्त्वा तस्मै सनामग्रहणं राजपुत्रान्न्यवेदयत । पर्याणरत्नज्योतिर्भिर्जनितेन्द्रायुधप्रभमिन्द्रायुधं प्रवेश्य बलाहकः प्राह स्म—पारसीकाधिपतिना देवस्योपायनीकृतमिममश्वमारोहेति । तं तुरङ्गमं दृष्ट्वा परं विस्मयमापन्नश्चन्द्रापीडोऽचिन्तयत् । नैष सत्यं तुरङ्गमः । कोऽपि महात्मा शापवशात्तुरङ्गतां प्राप्त इति । बलाहकसमर्पितकुसुमस्रगलङ्कारदुकूलकृतमण्डनश्चन्द्रापीडो गुरूनामन्त्र्य ब्राह्मणैर्दत्ताशीस्तुरगाधिरूढेन वैशम्पायनेन सहेन्द्रायुधमारुह्य विद्यागृहान्निर्जगाम । शनैर्नगरीं च प्रविवेश ।

नृपभवनद्वारं प्राप्य तुरगादवतीर्य हर्षबाष्पार्द्रचक्षुः पितुश्चरणौ ववन्दे । राजा तमालिङ्ग्य शिरस्युपाघ्रायोत्सङ्गे निवेशयितुमैच्छच्चन्द्रापीडस्तु भूमावेवोपाविशत् । ततो

कृतविद्यम्—अधीतविद्यम् । पर्याणम्—अश्वपीठास्तरणम् (ज़ीन) । उच्चैःश्रवः—इन्द्रस्याश्वः । गुरून् आमन्त्र्य—गुरूणामनुज्ञामधिगम्य ।

राज्ञा विसृष्टो मातरं विलासवतीं सर्वाण्यन्तःपुराणि शुकनासं तत्पत्नीं मनोरमां च प्रणनाम । सर्वत्रावासाशी-श्चन्द्रापीडः सर्वोपकरणोपेतं पित्रा तदर्थं पूर्वमेव प्रकल्पितं कुमारभवनं जगाम ।

—०—

शुकनासस्योपदेशः

कियत्स्वपि दिनेष्वतीतेषु राजा चन्द्रापीडस्य यौवराज्याभिषेके मतिं चकार । सन्निकृष्टाभिषेकं दर्शनार्थमुपागतं चन्द्रापीडं शुकनास उवाच—तात, विज्ञातशास्त्रस्य विनयाचारशालिनो विदितवेदितव्यस्य स्थिरमतेस्तव नाल्पमप्युपदेष्टव्यमस्ति । किं तु लोकोत्तरा लक्ष्मीर्नयनाभिरामं वपुर्नवं वयः प्रकृष्टा शक्तिरिति महतीयमनर्थपरम्परा । एकैकमप्येतेषां सर्वाविनयानां स्थानं किं पुनस्तेषां समवायः । लक्ष्मीर्नाम परं पुंसां चेतोविकारकारणम् । हृदयानुप्रवेशिभिर्धूर्तैर्मुखमधुभिरापातरमणीयेषु विषयेषु राजानः प्रवर्त्यन्ते । तस्मात्कुमार तथा प्रयतेथाः

यौवराज्यम्—युवराजपदम् । विदितवेदितव्यस्य—ज्ञातज्ञातव्यस्य । लोकोत्तरा—अद्भुता । आपातरमणीयेषु—बाह्यदृष्ट्या मनोहरेषु । वस्तुतः परिणामे दुःखदेषु । अभिरामम्—रमणीयम् । समवायः—समुदायः ।

यथा धूर्तैर्न वञ्च्यसे, साधुभिर्न निन्द्यसे, कामैश्च न प्रबाध्यसे। कामं भवान् प्रकृत्यैव धीरः पित्रा च महता प्रयत्नेन समारोपितसंस्कारः। तथापि भवद्गुणसम्पत्सन्तोष एव मां मुखरीकरोति। अयमेव कालस्तवोपदेशस्य। विरला हि राज्ञामुपदेष्टारः। पित्रा निवेशितां राज्यधुरां सम्यगुद्वहेति। ततः पुण्येऽह्नि स्नातं विधिवत्कृतमङ्गलं पुत्रं तारापीडो यौवराज्येऽभ्यषिञ्चत्।

—०—

दमयन्ती—स्वयंवरः

निषधेषु वीरसेनसुतो धर्मार्थकोविदो रूपवानिष्टैर्गुणैरुपपन्नो नलो नाम महीपतिरासीत्। देवेन्द्र इव देवानां स सर्वेषां मनुजेन्द्राणां मूर्ध्न्यतिष्ठत्। तस्य द्यूतमतीव प्रियमासीत्। तथैव विदर्भेषु भीमपराक्रमोऽप्रजाः प्रजाकामः सर्वगुणोपेतो भीमो नाम नृपो बभूव। तेन नृपेण महर्षिर्नारदः सयत्नं सत्कृतस्तोषितश्च। प्रजैककामाय

मुखरीकरोति—वक्तुं प्रेरयति। पुण्ये—पवित्रे। अप्रजाः—सन्तान रहितः।

तस्मै नारदः प्रसन्नः सन् वरं ददौ—तव महिषी दमयन्तीं नाम कन्यारत्नं दमं दान्तं दमनं च त्रीनुदारान्कुमारान् जनयिष्यतीति। दमयन्ती गच्छता कालेन बाल्यात्परां दशामध्युवास। तदा साऽनवद्याङ्गी सर्वाभरणभूषिता सखीनां मध्ये विद्युदिवाशोभत। तादृशी नयनाभिरामा बाला न मानुषेषु यक्षेषु देवेष्वपि वा दृष्टपूर्वा श्रुतपूर्वा वा। नलोऽपि भुवि रूपेणातुलेनापरः कन्दर्प इवाभवत्। नलस्य समीपे जना दमयन्त्या रूपगुणादिसम्पदं कुतूहलाद् भृशं प्रशशंसुः। तेन च नलस्य दमयन्त्यामनुरागस्तथा ववृधे यथा हृद्गतं कामं धारयितुमशक्नुवन्सोऽन्तःपुरसमीपस्थे वन एकाक्येव रहोऽवसत्।

एकदा सुवर्णपक्षधरान्हंसान् वने विचरतो दृष्ट्वा तेषामेकं स जग्राह। खगो नलं व्याजहार—"राजन्! अक्रूरमतिः खगोऽहं, न त्वया हन्तव्यः, यदि मम प्राणान्रक्षसि तव प्रियं सम्पादयिष्यामि। दमयन्त्याः सकाशे त्वां तथा प्रशंसिष्यामि, यथा त्वदन्यं पुरुषं सा

महिषी—राज्ञी। बाल्यात् परां दशाम्—युवावस्थाम्। अनवद्यम्—सुन्दरम्। व्याजहार—उवाच।

न कदापि मंस्यते तवैव च भार्या भविष्यतीति"। एवमुक्तो राजा हंसमुत्ससर्ज। सर्वे हंसाः समुत्पत्य विदर्भान्गत्वा दमयन्तीमुपसृत्य भूमौ निपेतुः। ससखी दमयन्ती प्रेक्ष्य तेषामद्भुतं रूपं विस्मिता तान्ग्रहीतुमैच्छत्। हंसास्तु दमयन्त्या सखीभिश्चानुगम्यमानाः सर्वतः प्रमदावने विसस्रुपुः। यं हंसमन्वधावद्दमयन्ती स मानुष्या गिरा तामुवाच–"दमयन्ति! निषधेषु नलो नाम गुणराशिरश्विनोस्तुल्यो रूपेण शासिता प्रजानां मनुरिव भूपतिर्वर्तते। तस्य यदि त्वं भार्या भवेस्तर्हि सुदति! तव जन्म सफलं भवेत्। नरेषु नलो वरस्त्वं च स्त्रीणां रत्नम्। यदि युवयोः सङ्गमो भवेत् तर्हि स रत्नेन काञ्चनस्येव सर्वेषां प्रीतये कल्पेतेति"। एवमुक्ता दमयन्ती हंसमादिशत्–त्वमप्येतदेव नलं वदेति। हंसः सकलमुदन्तं नैषधाय निवेदयांचक्रे।

हंसवचनादारभ्य दमयन्ती स्वास्थ्यं न लेभे। नलबद्धपरमानुरागा सा विवर्णवदना कृशा तत्क्षणं बभूव। तस्यास्तामवस्थां सखीजनो राज्ञे न्यवेदयत्। विदर्भपतिः कन्यां प्राप्तयौवनां दृष्ट्वा दमयन्त्याः स्वयंवरं कार्यममन्यत।

हंसवचनादारभ्य—हंसोक्तिश्रवणानन्तरम्। सुदति—शोभनदन्ते। उदन्तम्—वृत्तान्तम्।

तेन सर्वेभ्यो नृपेभ्यो दमयन्तीस्वयंवरवार्ताख्यापनार्थं दूता विसृष्टाः । हस्त्यश्वरथघोषेण वसुधां पूरयन्तो विचित्रमाल्याभरणैर्विविधायुधधारिभिर्बलैरुपेता राजानो दमयन्त्याः स्वयंवरमभिजग्मुः भीमेन कृतामातिथेयीं सत्क्रियां च जगृहुः ।

अत्रान्तरे महाप्राज्ञौ महर्षिसत्तमौ देवराजस्य मघोनो भवनं गतौ नारदपर्वतौ तेन सुपूजितौ तस्मा ऊचतुः । मघवन् ! विदर्भराजस्य दुहिता दमयन्ती योषिद्वरा स्वयंवरमास्थास्यति । तां लोकस्य ललामभूतां महीक्षितः प्रार्थयन्त इति । अनवासितवचने नारदेऽग्न्यादयो लोकपालां देवराजसभामागत्य नारदवचो निशम्याब्रुवन् । वयमपि तत्र गच्छाम इति । सेन्द्रा लोकपाला विदर्भानभिप्रतस्थिरे । नलोऽपि दमयन्तीं ध्यायन्विदर्भानभ्यगच्छत् । लोकपाला रूपेण रविमिव भ्राजमानं नलं दृष्ट्वा तस्य रूपसम्पदा विस्मिता अन्तरिक्षे विमानानि विष्टभ्य नभस्तलादवतीर्याब्रुवन्—भोः सत्यव्रत नल,

---

आतिथेयीम्—अतिथियोग्याम् । मघोनः—इन्द्रस्य । पर्वतः-पर्वतनामक ऋषिः । ललामभूताम्—मनोहराम् । अनवासितम्—असमाप्तम् । विष्टभ्य—आश्रित्य ।

दूतो भूत्वास्माकं साहाय्यकं कुर्विति। करिष्य इति तेभ्यः प्रतिश्रुत्य तामलः पर्यपृच्छत्। के भवन्तः, कस्य दौत्यं मया कार्यं, कस्मिन्कर्मण्यहं नियुक्त इति। मघवा प्रत्यभाषत। अस्मान्दमयन्त्याः कृते समागतानमराबि-बोध। इंद्रो वरुणोऽग्निर्यमश्च त्वां दिदृक्षवः समागताः तेषामेकतमं पतिं वरयस्वेति दमयन्त्यै निवेदयस्वेति। नलः प्राञ्जलिः प्रत्युवाच। यत्र बद्धभावा यूयं तत्रैव ममानुराग इति मां प्रेषयितुं नार्हथेति। शचीपतिः पुनरब्रवीत्। करिष्य इति पूर्वं प्रतिश्रुत्य किमर्थमधुना स्ववचनं न करोषि। व्रज विलम्बं मा कु-र्विति। एवं देवैरुक्तो नलोऽब्रवीत्। सुरक्षितानि राजसद-नानि प्रवेष्टुमहं कथं शक्ष्यामीति। अस्मत्प्रभावेण शक्ष्य-सीति शक्र उवाच।

तथेत्युक्त्वा नलो दमयन्त्या निवेशं जगाम। तत्र वपुषा देदीप्यमानां सुकुमाराङ्गीं तनुमध्यां वदनकान्त्या चन्द्रमसमपि प्रत्यादिशन्तीं सखीगणसमावृतां तां दृष्ट्वा

प्राञ्जलिः-अञ्जलिं बद्ध्वा। बद्धभावाः—कृतानुरागाः। शक्रः-इन्द्र। तनुमध्याम्—कृशकटिम्। प्रत्यादिशन्तीम्-प्रत्याचक्षाणाम्।

तस्य कामो ववृधे,सत्यनिष्ठस्तु कथं कथमपि तमधारयत्। नलमप्रतिमरूपं दृष्ट्वा सख्यो विस्मिताः किञ्चिदपि व्याहर्तुमक्षमा अभवन्। दमयन्ती तु स्मितपूर्वं नलमभ्यभाषत। सर्वानवद्याङ्ग वीर, कस्त्वं कुतः समागतः कथं चात्रालक्षितस्ते प्रवेशः। इदं वेश्म सुरक्षितं वर्तते राजा चोग्रशासन इति। नलः प्रत्युवाच। कल्याणि,देवानां दूतं मां नलं विद्धि। तेषामेव प्रभावेणाहमलक्षितोऽत्र प्रविष्टः। शक्राग्निवरुणयमानामेकतमं पतिं वरयेति। दमयन्ती देवेभ्यो नमस्कृत्य प्रहस्याब्रवीत्। राजन्, यत्तुभ्यं रोचते तत्कुरु किं करवाणि। अहं यच्चान्यत् किञ्चिन्ममास्ति तच्च सर्वं तव चरणेऽर्पितं, तवैव कृते मयैते नृपाः संनिपातिताः। त्वयि बद्धानुरागां मां यदि प्रत्याख्यास्यसि तर्हि विषमग्निं जलं रज्जुं वास्थास्य इति। नलः प्रत्युवाच-येषामहं पादरजसाऽपि न तुल्यस्तेषां लोकपालानां प्रणयं विहत्य कथं मां मानुषं पतिमिच्छसि। देवानां विप्रियं कुर्वन्नरो मृत्युमृच्छति। तस्मात्सुरोत्तमान्वरयस्वेति। शोकजलाप्लुतनेत्रा दमयन्ती नैषधमवोचत्! भोः सत्यव्रत नल, सर्वेभ्यो

संनिपातिताः-स्वयंवरे सन्निधातुमामन्त्रितः। प्रत्याख्यास्यसि—निषेधिष्यसि। विप्रियम्—विरुद्धम्।

देवेभ्यो नमस्कृत्याहं त्वामेव भर्तारं वृण इति । राजा तामुवाच । चारुहासिनि, देवानां दौत्येनात्रागत्याहं स्वार्थमेव सम्पादयितुं नोत्सह इति । ततो दमयन्ती बाष्पाकुलां वाचं प्रत्याहरन्ती स्मित्वा राजानमब्रवीत् । नरेश्वर, इन्द्रपुरोगमा देवा आयान्तु तेषामेव सन्निधावहं त्वां वरयिष्ये । एवं कृते न ते कोऽपि दोषो भविष्यतीति । ततो नलो देवानाजगाम । ते च तं सर्वमेव वृत्तान्तमपृच्छन् । स च सर्वं यथावृत्तं तेभ्यो न्यवेदयत् ।

पुण्येऽहनि भीमो महीपालान्स्वयंवर आजुहाव । नृपाः कनकस्तम्भरुचिरं तोरणेन विराजितं रङ्गं प्रविश्य विविधेष्वासनेष्वासत । देवैः सह नलोऽपि राजसमितिं प्रविवेश । ततः शुभानना राज्ञां चक्षूंषि मनांसि च प्रभया मुष्णती दमयन्ती रङ्गं प्राविशत् । राज्ञां नामसु सँकीर्त्यमानेषु भैमी नलतुल्याकारान्पञ्च पुरुषान्ददर्श । वयोवेशरूपैस्तुल्यानां तेषां यं यं ददर्श तं तं नलं मेने । प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत् । यदि मनसा वचसा चाहं

प्रत्याहरन्ती—निरुन्धाना । रङ्गम्—स्वयंवरभूमिम् । तोरणेन विराजितम्—मण्डपद्वारेण सुशोभितम् (adorned with archways मेहराब दार (रास्तों से सजाया हुआ) मुष्णती—हरन्ती ।

नातिचरामि तर्हि देवा नलं मे भर्तारं प्रदिशत, स्वं रूपं च धारयध्वं येनाहं पुण्यश्लोकं नलमभिजानीयामिति । दमयन्त्यास्तत्करुणं परिदेवनं श्रुत्वा तस्याश्च नैषधे परममनुरागं दृष्ट्वा देवाः स्वानि चिह्नान्यधारयन् । सा सर्वान् विबुधानस्वेदानम्लानस्रजो रजोहीनान् दृष्ट्वा नलं च तद्विपरीतं दृष्ट्वा विलज्जमाना तस्य वस्त्रान्तं जग्राह परमशोभनां स्रजं च तस्य स्कन्धेऽसृजत् । नलः प्रहृष्टान्तरात्मा दमयन्तीमुवाच । कल्याणिनि, प्रार्थयमानानां देवानामपि सन्निधौ यत्त्वं मामेव भर्तारं वरयसे तस्माद्यावज्जीवं तव वचने रतोऽहं भवेयमिति । नलो दमयन्ती च देवाञ्शरणं जग्मतुः । चत्वारो लोकपाला नलायाष्टौ वरान्दत्त्वा त्रिदिवं गताः । पार्थिवेन्द्रेषु गतेषु भीमो नलस्य दमयन्त्याश्च विवाहं कारयामास । नैषधस्तत्र कानिचिद्दिनान्युषित्वा वैदर्भ्या समनुज्ञातः स्वं नगरं जगाम । राजा दमयन्त्यासह विविधान् कामान् भुञ्जानःप्रजा धर्मेण परिपालयंस्ता अरञ्जयत् । इन्द्रसेनं सुतमिन्द्रसेनां नाम कन्यां च दमयन्त्यां जनयामास ।

अतिचरामि—उल्लङ्घयामि । परिदेवनम्—विलापम् ।

विभीषणस्य शिक्षा

ततो विनिद्रं कृतदेवतार्चमाविष्कृताङ्गप्रतिकर्मरम्यं दृष्ट्यैव चित्तप्रशमं किरन्तं विभीषणं मातोवाच। आयुष्मन्! नाकसदामानन्दनस्त्वमतिमदोद्धतस्य जगन्ति प्रबाधमानस्य सोदरस्य विषस्यामृतमिव तूर्णं प्रशान्तिं कुरुष्व। तथा कुर्या येन रावणो विषादनीहारपरीतमूर्तिं सीतां जहाति। कुलानन्द! यावदसौ रावणो भयङ्करो विषस्य पिण्ड इव हरेण न संग्रस्यते पुरुषोत्तमेन, तावद्यतस्व। जनस्थाननिवासिनः खरदूषणादयो राक्षसा निहताः, लङ्कापुरी जितभटोत्खातद्रुमा च विहिता, सद्मानि च दग्धानि, तस्मादित्थं गते सति यद्भन्धुना विधेयं तस्मिन्घटस्वेति। सीताप्रत्यर्पणे पूर्वमेव कृतमतिः स विभीषण एवमतिमात्रं शुभयैव बुद्ध्या मात्रा प्रेर्यमाणश्चिरं ध्यानपरोऽभूत्। ततो विभीषणो निशाचरैः परिरक्षितं रावणमन्दिरस्य द्वारं ययौ। प्रतीहारेण दूरादेव नतोऽनावेदित-

---

प्रतिकर्म-प्रसाधनम्-अलङ्करणम्। नाकसदाम्—देवतानाम्। जनस्थानम्—दण्डकारण्यम्। उत्खातद्रुमा-उत्पाटितवृक्षा।

संप्रविष्टो निशाचरैः सगौरवं दत्तपथो विभीषणो भ्रातरं सिंहासनाधिरूढं दृष्टवान् । स विहितप्रणामः सिंहासने चारुं बाहुं निक्षिप्य किङ्करैः कल्पितं पीठमध्यास्त। ततो दशास्यः पाणिं प्रसार्य समितिं बभाषे। शक्तैर्नीतिष्वाम्नातिभिर्बुद्धिमद्भिरुपायविद्भिर्युष्मद्विधैः सार्धं सुमन्त्रितानि कार्याणि सिध्यन्ति। बालिखरादिनाशे सत्युपेक्षिते सागरमुत्तितीर्षौ द्विषां रामसुग्रीवादीनां सैन्ये यद्युक्तं तद्ब्रूतेति। प्रहस्तप्रमुखा यातुधाना भुजांसवक्षःस्थलकार्मुकासीन्गदाः शूलानि च परामृशन्तो दशास्यं प्रोचुः—अखण्ड्यमानमाखण्डलं परिखण्ड्योदीर्णदण्डस्त्वं हे नृपश्रेष्ठ! नराभियोगं गुरुत्वं किं नयसि। निर्यत्स्फुलिङ्गाकुलधूमराशिं भानुं किं भूमौ पिनषाम। किं द्यौरधोऽस्तु, अथवा क्षितिरन्तरिक्षे भवतु। का वा गणना सराघवेषु वानरेषु येऽस्माकं मध्यात्कस्यचिदपि प्रातराशाय नालम्। त्वदीयैर्भृत्यैः समोधितश्चापलययुक्तस्य

आम्नातिभिः—कृताभ्यासैः—पण्डितैः। परामृशन्तः—स्पृशन्तः। पिनषाम—चूर्णयाम। प्रातराशः—कल्यम् (कलेवा)

हनूमतो बालधिभाक्कृशानुर्लङ्कामधाक्षीदिति । अनन्तरं, विभीषणो यातुधानान्बभाषे । राज्ञा युद्धाय सुभृतैर्भवद्भिर्यदुक्तं तत्संभावनाया उचितमेव । किं तु प्रज्ञैव मन्त्रेऽधिकृता न शौर्यम् । यो जिगीषुर्वृद्धिक्षयौ प्रसमीक्षमाणः सन्ध्यादिषु गुणेषु घटते तं, चञ्चलाऽपि लक्ष्मीर्न मुञ्चति । एकेन शत्रुणा सन्धिरपरेण विग्रहः कार्यः । जिगीषुर्वृद्धिं प्रसमीक्ष्याहितात्मसारं विजानन्नेता नीतीः प्रयुञ्जीत । त्वया तु लोके विरागो जनितः, प्रकोपितं चेन्द्रमुख्यं विबुधमण्डलम् । रामे तु सर्वमेवैतद्विपरीतम् । यदैवैकेन शरेण बाली निहतः, सुग्रीवश्च राजा कृतस्तदैव भवतो विनष्टं कार्यम् । षड्वर्गवश्यः परिमूढबन्धुरुच्छिन्नमित्रो विगुणैरुपेतस्त्वं मा रामेण सह युद्धं कार्षीः । प्रणम तम् । रामोऽपि दाराहरणेन तप्तो हतैश्च बन्धुभिर्वयं तप्ताः, तस्माद्यथा तप्तस्यायसस्तप्तेन तथा नो रामेण सह संधिरस्तु । सीतां विमुञ्च । यद्यपि दण्डेन कोशेन चात्मानमरेः प्रकृष्टं मन्यसे तथापि रिक्तस्य रामस्य पूर्णेन त्वया वृथा विनाशः, पूर्णस्य तव भङ्गे तु बहु हीयते । सुनीती रामो जेतुं न शक्यते, तेन

बालधिः—पुच्छम् । षड्वर्गः—कामक्रोधादिः ।

सह कलहे ध्रुवं तव विनाशः स्यात् । कपीन्द्रः सुग्रीवो भयाल्लोभाद्वा न राममभिगतो येन विभेद्यो भवेत् । सतां वर्त्मनि स्थितः सुग्रीवः प्रतिप्रियं चिकीर्षू राममभिगतः । रामेण विरोधे सति यं वयमुपाश्रयेम तं रामादधिकं तत्समं वा न कश्चिदपि पश्यामि । स्वयंभूर्नास्माकं शरणं यतो वरं दत्त्वाऽधुनासौ सानुशयो वर्तते । तस्माद्रामेण सन्धानमस्तु । निरूप्यमाणोऽपिनान्य उपायोऽस्ति । यदि विग्रहे मतिं करिष्यसि तर्हि कपयोऽचिरेण सर्वमेतन्नाशं नेष्यन्तीति । विभीषणोक्तं बहु मन्यमानो रावणस्य मातामहो माल्यवान्नाम वार्धककम्प्रमूर्धा परिणामनम्रं देहं प्रोन्नम्य रावणमुवाच । य एकः पदातिर्धनुष्मान् वियद्गताऽन्यनेकमायानि चतुर्दश रक्षःसहस्राण्यार्दीत् तत्र का वो मानुषमात्रशङ्का । सन्तापितैः सदेवैर्ब्रह्मर्षिभिर्नूनं रात्रिंचरक्षयाय नराकृतिर्वानरसैन्यशाली जगत्यजय्योऽभ्युपायो विहितः । प्रमादवान् क्षतधर्मवर्त्मा मुनीनामपि शत्रुभावं गतस्त्वं चेत्स्वकुलस्य शान्तिं बहु मन्यसे तर्हि विभीषणोक्तं कुरुष्वेति । तेन प्रहस्तादिघोषेण प्रतिलब्धसंज्ञो निद्राविलाक्षः श्रुतकार्यसारः कुम्भकर्णस्ततो मेघ

सानुशय :—सपश्चात्तापः । आर्दीत्—पीडयामास ।

इव साम्बुरन्तरिक्षे वाक्यमभाषत । मध्यगतोऽपि भानुरौष्ण्यं त्यजेदथवा हिमांशुर्निशायां शैत्यं त्यजेन्न पुनः पौलस्त्यो भुवनावमानी सर्वानिर्थमूलं मानं त्यजेदिति मन्ये। तथापि यन्माद्विधाः सिद्धिमभीप्सवस्त्वां विलामचेष्टं प्रसभं वक्तुं यतन्ते तत्स्नेहमूलम् । क्रूराः क्रिया ग्राम्यसुखेषु सङ्ग इति यो वृद्धैः पुण्यस्य संक्षयहेतुरुक्तोऽसौ भवताऽतिमात्रं निषेवितः। तस्य फलमचिरादेव लप्स्यसे त्वत्प्रसादेन मया किं नोपभुक्तम् । तस्मादित्थं कृतार्थस्य मम यदि त्वदर्थे मृत्युः स्यात्तदा मम जन्म सफलं भवेदिति। एवमुक्त्वा प्रसुप्ते कुम्भकर्णे विभीषणो राक्षसेन्द्रं पुनरुवाच । विपरीतानि निमित्तानि दृश्यन्ते । असौ विवस्वानुत्पातजं वक्त्राकृति च्छिद्रं व्याद्वाय धूसररश्मिराशिर्जनानत्तुं कीर्णसटः सिंह इवाभ्युदेति । क्ष्मां कम्पयन्त्यश्चोल्का निपतन्ति । शृगालादयो रुवन्तः परितो नो भ्राम्यन्ति । यस्मादेवं विनाशसूचकानि निमित्तानि तस्मात्त्वं सीतां प्रत्यर्प्य रामेण सह सन्धिं कुर्विति । दशाननो भीषणरूक्षचक्षुर्भ्रूभङ्गमाधायोग्रपदां गिरं विभीषणं जगाद । उदके शिलातरणं, रवेर्ध्वान्तस्यन्दः, इन्दोर्वाह्निनिःसृतिः, विजिगीषोर्मम परेणापजय

इत्येतानि चत्वारि तुल्यानि । ज्ञातय आत्मनोऽपि क्षयमिच्छन्ति न पुनस्तुल्यकुलस्य लक्ष्मीम्, तथा च शत्रून्नमन्ति न च सन्तप्यमानैर्हृदयैर्बन्धुवृद्धिं सहन्ते । त्वयाद्य लङ्काभिभवेऽतिहर्षादतिमात्रं दुष्टोऽन्तरात्मा विवृतः । धिक्त्वामिति । इदं वदन्रावणस्तस्य शिरसि पार्ष्णिं ददौ । ततो विभीषणो रोषं क्षमया मन्युं धैर्येण गर्वं विनयेन मोहं धिया निगृह्णन्समं चतुर्भिः सचिवैरुद्-तिष्ठत् । रावणं चोवाच । महाराज मया विना सुखमा-स्स्व । यन्मूर्ख आतुरः पथ्यकटूननश्नन्सामयो भवति स किं भिषजां दोषः । यो विवेकशून्य आत्ममानी प्रभुः स्फुटमुच्यमानो वैरं करोति, श्रोत्रसुखैरपथ्यैश्च प्रतुष्यति, स सुहृदां महतेऽनर्थाय भवति । धर्म्ये पथि स्थितस्य मे पादेन योऽयं भवता प्रहारो दत्तः स कस्य लाघवमादधातु, तत् सह मन्त्रिमुख्यैस्त्वया चिन्तनीयमिति । एवं रजनी-चरपतिमुक्त्वा विभीषणो लङ्काया निरगच्छत् ।

पार्ष्णिं ददौ—पादाघातमकरोत् ; सामयः—रोगी । आत्ममानी—गर्वावलिप्तः ।

शिवराजापजलखानयोर्युद्धम्

इतस्तु यवनकुलभुज्यमानविजयपुराधीशप्रेषितस्तस्यान्यतमः सेनानीरपजलखानः प्रतापदुर्गाद् विदूरे एव शिववीरेण सह युद्धक्रीडया चिक्रीडिषुः ससेनस्तिष्ठति स्म ।

ततः संवृत्ते किञ्चिदन्धकारे धूपधूमेनेव व्याप्तासु दिक्षु, भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाण आगतप्रत्यागतं च विदधानः प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषीत् । ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशेऽवतमसवशादागन्तारं कमप्यनवलोकयन् गम्भीरस्वरेण समवादीत् "कः कोऽत्र भोः ? "कः कोऽत्र भोः" इति ! अथ क्षणानन्तरं पुनः स एव ध्वनिरश्रावि, इति भूयः साक्षेपमवोचत् "क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः" ? ततो "दौवारिक ! शान्तो भव किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि" । अथ "तत्किं नाज्ञाय्यद्यापि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिःपृष्टो

सेनानीः—सेनापतिः । अवतमसम्—गाढान्धकारः ।

ऽपि प्रत्युत्तरमदद्भन्तव्य इति" इत्येवं भाषमाणेन द्वाःस्थेन "क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन् द्वादशवर्षेण केनापि भिक्षु-वटुनाऽनुगम्यमानः कोऽपि काषायवासा धृततुम्बीपात्रो रुद्राक्षमालिकासनाथितकण्ठो भव्यमूर्त्तिः संन्यासी दृष्टः। ततस्तयोरेवमभूदालापः—

(संन्यासी) कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

(दौवारिकः) भगवन् ! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमदद्देवायाति इत्याक्रुश्यते ।

(संन्यासी) सत्यं क्षान्तोऽयमपराधः, परमद्यावधि संन्यासिनो, ब्रह्मचारिणः, पण्डिताः, स्त्रियो, बालाश्च न किमपि प्रष्टव्याः, आत्मानमपरिचाययन्तो ऽपि च प्रवेशनीयाः ।

(दौवारिकः) संन्यासिन् ! संन्यासिन् ! बहूक्तं विरम। न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे, किन्तु

प्रतीक्षामहे—गणयामः

यो वैदिकधर्मरक्षाव्रती, यश्च संन्यासिनां ब्रह्मचारिणां तपस्विनां च संन्यासस्य ब्रह्मचर्यस्य तपसश्चान्तरायणां हन्ता, येन च वीरप्रसविनीयमुच्यते कोङ्कणदेशभूमिस्तस्यैव महाराजशिववीरस्याज्ञां वयं शिरसा वहामः ।।

(संन्यासी) अथ किमप्यस्तु, पन्थानं निर्दिश, आवां शिववीरनिकटे जिगमिषावः ।

(दौवारिकः) अलमालप्यापि तत् । प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ ।

(संन्यासी) तत्किं कोऽपि न प्रविशति रात्रौ ?

(दौवारिकः) [साक्षेपम्] कोऽपि कथं न प्रविशति, परिचिता वा प्राप्तपरिचयपत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः, ये तुम्बीं गृहीत्वा द्वाराद् द्वारम् इति कथयन्नेव तत्तेजसेव धर्षितो मध्य एव विरराम ।

(संन्यासी) [स्वगतम्] राजनीतिनिष्णातः शिववीरः, सर्वथा दौवारिकतायोग्य एवायं द्वारपालः स्थापितोऽस्ति । परीक्षितमप्येकस्मिन् विषये पुनः परीक्षिष्ये तावत् [प्रकटम्] । दौवारिक ! इव

अन्तरायाणाम्—विघ्नानाम् । अलमालप्य—न वक्तव्यम् प्राह्ण-प्रभाते ।

आयाहि किमपि कर्णे कथयिष्यामि ।

(दौवारिकः) [तथा कृत्वा] कथ्यताम् ।

(संन्यासी) निरीक्षस्व, त्वमधुना दौवारिकोऽसि, प्राणानगणयन् जीविकां निर्वहसि । त्वं सहस्रं वा अयुतं वा मुद्रा राशीकृताः कदापि प्राप्स्यसीति न कथमपि संभाव्यते ।

(दौवारिकः) आम्, अग्रे कथ्यताम् ।

(संन्यासी) वयं च संन्यासिनो वनेषु गिरिकंदरेषु च विचरामः, सर्वं रसायनतत्वं विद्मः ।

(दौवारिकः) स्यादेवम्, अग्रे अग्रे ।

(संन्यासी) तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धे-स्तदधुनैव परिष्कृतं पारदभस्म तुभ्यं दद्यां यथा गुञ्जामात्रेणापि द्वापञ्चाशत्संख्याकतुलापरिमितं ताम्रं सुवर्णं विधातुं शक्नुयाः ।

(दौवारिकः) हंहो कपटसंन्यासिन् ! कथं विश्वासघातं शिक्षयसि स्वामिवञ्चनं च? ते केचन अन्ये भवन्ति जारजाता ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशाः (संन्यासिनो

हस्तं धृत्वा) इतस्तु सत्यं कथय, कस्त्वं कुतआ यातः, केन वा प्रेषितः ?

(संन्यासी) [स्मित्वेव] अथ त्वं मां कं मन्यसे ?

(दौवारिकः) अहं तु त्वामस्यैव ससेनस्यायातस्य अपजलखानस्य–

(संन्यासी) (विनिवार्य मध्ये एव) धिग् धिक् !

(दौवारिकः) कस्याप्यन्यस्य वा गूढचरं मन्ये । तदादेशं पालयिष्यामि प्रभुवर्यस्य [हस्तमाकृष्य] आगच्छ दुर्गाध्यक्षसमीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।

ततः संन्यासी तु "त्यज नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि, दयस्व दयस्व" इति सहस्रधा समचकथत्, तथाऽपि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः ।

अथ यावद् द्वारस्थस्तम्भोपरि संस्थापितायां काचमञ्जूषायां जाज्वल्यमानस्य प्रबलप्रकाशस्य दीपस्य समीपे समायातस्तावत्संन्यासिनोक्तं "द्वौवारिक ! अपि मां पूर्वमपि कदाप्यद्राक्षीः" ? ततो दौवारिकः पुनस्त्वं

निपुणं निरीक्षमाणो मन्द्रेण स्वरेण अरुणापाङ्गाभ्यां लोचनाभ्यां, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण च हारिणा मुखमण्डलेन पर्यचिनोत्, भुशुण्डी समुत्तोलनकिणकर्कशकरग्रहमपहाय सलज्ज इव च नम्रीभूय प्रणमन्नुवाच-"आः कथं श्रीमान् गौरसिंह आर्यः! क्षम्यतामनुचितव्यवहार एतस्य ग्राम्यवराकस्य" तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत्—"दौवारिक, मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि च यथायोग्य एव पदे नियुक्तोऽसीति। त्वादृक्षा एव प्रभूणां पुरस्कारभाजनानि भवन्ति, लोकद्वयं च विजयन्ते। तव प्रामाणिकतां जानात्येवात्र भवान् प्रभुवर्यः, परमहमपि विशिष्य कीर्तयिष्यामि, निर्दिश तावत् कुत्र श्रीमान्, किञ्चानुतिष्ठति।

ततः पुनर्बद्धाञ्जलेर्दौवारिकस्य किमपि कर्णे कथितमाकर्ण्य, प्रधानद्वारमुल्लङ्घ्य नेदीयस्यामेकस्यां निम्बतरुतलवेदिकायां सहचरं समुपवेश्य, तुम्बीमेकतः संस्थाप्य, स्वाङ्गरक्षिकावरणं काषायवसनं चैकतो निम्बशाखायाम

किणम्—आघातचिह्नम्। नेदीयस्याम्—समीपस्थायाम्।

वलम्ब्य , पटखण्डेन पक्ष्मणोः कपोलयोः कर्णयोर्भ्रुवो श्चिबुके नासायां केशप्रान्तेषु च च्छुरितामिव विभूतिं प्रोञ्छ्य , स्कन्धयोः पृष्ठे च लम्बमानान् मेचकान् कुञ्चितान् कचानाबध्य, सहचरपोटलिकात उष्णीषमादाय शिरसि चाधाय सुन्दरमुत्तरीयं चैकं स्कन्धयोर्निक्षिप्य दौवारिकनिर्देशानुसारं श्रीशिववीरालङ्कृतामङ्गालिकां प्रति प्रातिष्ठत ।

शिववीरे तत्सहचरेषु चापजलखानदमनविषयकवार्तामारिप्सुष्वेव कश्चिद्वेत्रहस्तः प्रतीहारः प्रविश्य वेत्रं कक्षे संस्थाप्य शिरो नमयित्वाञ्जलिं बद्ध्वा न्यवीविदत् "प्रभो श्रीमान् गौरसिंहो दिदृक्षतेऽत्र भवन्तम् ।" तदाकर्ण्य "आं प्रवेशय प्रवेशय" इति सानन्दं सोत्साहं च कथितवति महाराष्ट्रमण्डलाखण्डले प्रतीहारो निवृत्य सपद्येव तं प्रावीविशत् । कुशलप्रश्नानन्तरं तेषामेवमभूदालापः ।

शिववीरः—अथ कथ्यतां को वृत्तान्तः ? काच व्यवस्था अस्मन्महाव्रताश्रमपरम्परायाः ?

छुरिताम्—लग्नाम् । मेचकान्—कृष्णवर्णान् । कुञ्चितान्—कुटिलान् । आरिप्सुषु—आरब्धुमिच्छुषु ।

गौरसिंहः—भगवन्! सर्वं सुसिद्धम्; प्रतिगव्यूत्यन्तरालमङ्गीकृतसनातनधर्मरक्षामहाव्रतानां धारितमुनिवेषाणां वीरवराणामाश्रमाः सन्ति, प्रत्याश्रमंच वलीकेषु गोपयित्वा स्थापिताः परश्शताः खड्गाः, पटलेषु तिरोभाविताः शक्तयः, कुशपुञ्जान्तः स्थापिताः भुशुण्डयश्च समुल्लसन्ति। उञ्छस्य च शिलस्य समिदाहरणस्य इङ्गुदीपर्यन्वेषणस्य सत्सङ्गस्य च व्याजेन केचन जटिलाः परे मुण्डिन इतरे काषायिणोऽन्ये मौनिनोऽपरे ब्रह्मचारिणश्च बहवः पटवो बटवश्चराः संचरन्ति। विजयपुरादुड्डीयात्रागच्छन्त्या मक्षिकाया अप्यन्तःस्थितं वयं विद्मः, किं नामैषां यवन हतकानाम्।

शिववीरः-साधु साधु कथं न स्यादेवम्। भारतवर्षीया यूयम् तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः, तमेते जाल्माः समूलमुच्छिन्दन्ति, महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते न च धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा निशीथेष्वपि, वर्षास्वपि ग्रीष्मघर्मे-

---

गव्यूतिः—क्रोशद्वयम्। वलीकेषु—नीध्रेषु। उञ्छस्य—कणश-आदानस्य। शिलस्य—कणिशार्जनस्य। यौष्माकीणः—युष्माकम्। जाल्माः—असमीक्ष्यकारिणः।

ष्वपि, महारण्येष्वपि, चन्द्रहासचमत्कारेष्वपि च निर्भया विचरन्ति । तद् धन्याः स्थ, यूयं वस्तुतः आर्यवंशीया वस्तुतश्च भारतवर्षीयाः ।

अथ कथ्यतां कोऽपि विशेषोऽवगतो वापजलखानस्य विषये ?

गौरसिंहः—अवगतः, एकं पत्रं दर्शयामि । तत्पत्रं तेनैकं यवनयुवकं निहत्य प्राप्तमासीत् । सर्वे च विजय-पुराधीशमुद्रामवलोक्याश्चर्यचकिता बभूवुः ।

शिववीरः—दर्श्यतां, प्रसार्यतां, पठ्यतामिदम् ।

गौरसिंहः—भगवन् ! सर्पाकारैरक्षरैः पारस्यभाषायां लिखितं पत्रमेतदस्ति । एतस्य सारांशोऽयमस्ति—विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति—यत् "वीरवर ! महाराष्ट्रराजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत्कश्चनान्तरायस्तव विजये । शिवं युद्धे जेष्यसि चेत् पद्भ्यां सिंहं जितवानसीति मंस्ये, किन्तु सिंहहननापेक्षया जीवतः सिंहस्य वशीकार एवाधिकं प्रशस्यः । तद्यदि च्छलेन जीवन्तं शिवमानये-स्तद् वीरपुङ्गवोपाधिदानसहकारेण तव महतीं पदवृद्धिं कुर्य्याम् । गोपीनाथपण्डितोऽपि मया तव निकटे प्रस्था-

---

चन्द्रहासः—खड्गः । —(मुद्राम्-मोहर)

पितः। स मम तात्पर्य्यं विशदीकृत्य तव निकटे कथयिष्यति, प्रयोजनवशेन च शिवमपि साक्षात् करिष्यतीति।

शिववीरः—ज्ञायते कश्चिद् वृत्तान्तो गोपीनाथपण्डितस्य? यावद् गौरसिंहः किमपि विवक्षति तावत्प्रतीहारः प्रविश्य, "विजयतां महाराज" इति त्रिर्व्याहृत्य करौ संपुटीकृत्य शिरो नमयित्वा कथितवान् "भगवन्! दुर्गद्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरुपतिष्ठते। नायं समयः प्रभूणां दर्शनस्य, पुनरागम्यताम्" इति बहुशः कथ्यमानोऽपि "किञ्चनात्यावश्यकं कार्यम्" इति प्रतिजानाति। तदत्र प्रभुचरणा एव प्रमाणम्।"

तदवगत्य "सोऽयं गोपीनाथः, सोऽयं गोपीनाथ" इति साम्रेडं सतर्कं सोत्साहं च व्याहृतवत्सु निखिलेषु शिववीरेण निजबाल्यप्रियो माल्यश्रीकनामा सम्बोध्य कथितो यद् गम्यतां दुर्गान्तरे महावीरमन्दिरे तस्मै वासस्थानं दीयताम्, भोज्यपर्यङ्कादिसुखदसामग्रीजातेन च सत्क्रियताम्, ततोऽहमपि साक्षात्करिष्यामि" इति।

ततो वाढमित्युक्त्वा प्रयाते माल्यश्रीके "महाराज,

विवक्षति—वक्तुमिच्छति। प्रतीहारः—द्वारपालः। साम्रेडम्—पुनः पुनः। पर्यङ्कम्—(पलङ्ग)।

आज्ञा चेदहमद्यैवापजलखानं कथमपि साक्षात्कृत्य तस्याखिलं व्यवसितं विज्ञाय प्रभुचरणेषु विनिवेदयामि। नाधुना मम क्षान्तिः शान्तिश्च यतः संन्यासिवेषोऽहं समागच्छन् द्वयोर्यवनभटयो वार्तयावागमं यत् श्व एवैते युयुत्सन्ते" इति गौरसिंहो मन्दं कर्णान्तिकं व्याहार्षीत्।

ततो "वीरकुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीम् तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान्वेत्सि। किन्तु परिपन्थिन एते अत्यन्तनिर्दयाः, अति कदर्याः, अतिकूटनीतयश्च सन्ति। एतैः सह परमसावधानतया व्यवहरणीयम्" इति कथयित्वा शिववीरस्तं विससर्ज।

गौरसिंहस्तु त्रिःप्रणम्योत्थाय निवृत्य निर्गत्य, अवतीर्य गायकवेषं धारयित्वापजलखानशिविराभिमुखं प्रतस्थे।

ततः प्रहरिणादुर्भाषायां "कोऽय, कोऽयं" इति पृष्टो गौरसिंहोऽवोचत् "गायकोऽहं, श्रीमन्तं दिदृक्षे" इति। ततो "गम्यतामन्येऽपि गायका वादकाश्च सम्मत्येव गताः सन्ति" इति कथयति प्रहरिणि शिविरमण्डलं प्रविवेश। तत्र गत्वा तेनापजलखानः साक्षात् कृतः, अखिले शिविरे

व्यवसितम्—चिकीर्षितम्। व्याहन्मि—भग्नं करोमि। परिपन्थिनः-शत्रवः। अतिकदर्याः—कुकर्मपरायणाः। शिविरम्-कटकम् (छावनी)। प्रहरी-यामिकः।

परिभ्रमता सर्वावस्था दृष्टा ।

इतस्तु प्रतापदुर्गे विहिताहारव्यापारे रजतपर्य्यङ्किका-मेकामधिष्ठिते, किञ्चित् तन्द्रापरवशे इव गोपीनाथे, शनैः शिववीरः उपसृत्य प्रणम्य उपाविशदवोचच्च ।

"अहोभाग्यमस्माकं यदालयं युष्मादृशा भूदेवाः स्व-पादरजोभिः पावयन्ति" इति । अथ तयोरेवमभूवन्नालापाः ।

गोपीनाथः—राजन् ! कोऽत्र सन्देहः, सर्वथा भाग्य-वानसि, परं साम्प्रतं नाहं पण्डितत्वेन, कवित्वेन वा समा-यातोऽस्मि, किन्तु यवनराजदूतत्वेन, तच्छ्रूयतां, यदहं निवेदयामि ।

शिववीरः— शिव ! शिव ! खलु खलु खल्विदमुक्त्वा ! येषां श्रीमतां चरणेनाङ्कितं विष्णोरपि वक्षःस्थलमैश्वर्यमुद्रयेव मुद्रितं विभाति, न तेषां ब्राह्मणकुलकमलदिवाकराणां यवनकै-ङ्कर्यकलङ्कपङ्को युज्यते, यं शृण्वतोऽपि मम स्फुटत इव कर्णौ, तथापि कुलीना निरभिमाना भवन्ति इति आनीतश्चेत् कश्चित् सन्देशस्तदेष आज्ञाप्यतां श्रीमच्चरणकमलचञ्चरीकः ।

गोपीनाथः—वीर ! कलिरेष कालो, यवनाक्रान्तोऽयं

खलु इदमुक्त्वा—न वक्तव्यम् । कैङ्कर्यम्—दासत्वम् चञ्चरीकः—भ्रमरः ।

भूभागस्तन्नास्माकं तथा तानि तेजांसि यथा वर्णयसि। साम्प्रतं तु विजयपुराधीशवितीर्णां वृत्तिं भुञ्ज इति तदाज्ञामेव परिपालयामि, तच्छ्रूयतां तदादेशः।

शिववीरः—आर्य अवदधामि।

गोपीनाथः—कथयति विजयपुरेश्वरो यद् "वीर! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षया अत्यन्तमाधिकं बलिनो वयं, प्रवृद्धोऽत्र कोषो, महती सेना, बहूनि दुर्गाणि, बहवश्च वीराः सन्ति। तच्छुभमात्मानमिच्छसि चेत्, त्यक्त्वा निखिलां चञ्चलतां शस्त्रं दूरतः परित्यज्य करप्रदतामङ्गीकृत्य समागच्छ मत्सभायां तन्मत्तः प्राप्तपदश्चिरं जीविष्यसि, अन्यथा तु सदुर्दशं निहतः कथावशेषः संवत्स्र्यसि, तत् केवलं त्वयि दययैव सन्देशं प्रेषयामि"।

शिववीरः—भगवन्! कथयेदेवं कश्चिद् यवनराजः, परं किं भवानपि मामनुमन्यते यद्—ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा, मन्दिराणि समुन्मूल्य, तीर्थस्थानानि पक्कणीकृत्य, पुराणानि पिष्ट्वा, वेदपुस्तकानि विदार्य च आर्यवंशीयान्

अवदधामि—सावधानोऽस्मि। संवत्स्र्यसि—भविष्यसि। पक्कणीकृत्य—शबरालयान् विधाय।

बलाद् यवनीकुर्वन्ति, तेषामेव चरणयोरञ्जलिं बद्ध्वा लालाटिकतामङ्गीकुर्याम् ! एवं चेद् धिङ्मां कुलकलङ्काङ्कितम् यः प्राणभयेन सनातनधर्मद्वेषिणां दासेरकतां वहेत् । यदि चाहमाहवे म्रियेय, वध्येय, ताड्येय वा तदैव धन्योऽहं, धन्यौ च मम पितरौ । कथ्यतां भवादृशां विदुषामत्र का सम्मतिः ?

गोपीनाथः–(विचार्य) राजन् ! धर्मस्य तत्त्वं जानासि, तस्माहं स्वसम्मतिं कामपि दिदर्शयिषामि । महती ते प्रतिज्ञा, महत्तवोद्देश्यमिति प्रसीदामितमाम् । नारायणस्तव साहाय्यं विदधातु ।

शिववीरः–करुणानिधान ! नारायणः स्वयं प्रकटीभूय न साहाय्यं विदधाति, किन्तु भवादृशमहाशयद्वारैव । तत्प्रतिज्ञायतां कापि सहायता ।

गोपीनाथः–राजन् ! कथ्यतां किमहं कुर्य्यां, परं यथा न मामधर्मः स्पृशेत् तथैव विधास्यामि ।

शिववीरः–शान्तं पापं, कोऽत्राधर्मः । केवलं श्वोऽस्मिन्नुद्यानप्रांतस्थपटकुटीरे यवनसेनापतिरपजलखान आनेयो यथा तेनैकाकिनाऽहमेकाकी मिलित्वा किमप्यालपामि ।

लालाटिकः—सेवकः । दासेरकताम्—दासताम् । शान्तं पापम्—अवक्तव्यमिदम् । पटकुटीरम्—(तम्बू)—उपकार्या ।

गोपीनाथः—तत् सम्भवति ।

ततःपरं गोपीनाथेन सह शिववीरस्य बहुविधा आलापा अभूवन्, यैः शिववीरस्य उदारहृदयतां, धार्मिकतां शूरतां चावगत्य गोपीनाथोऽतितरां पर्य्यतुष्यत् ।

तदा कपटगायको गौरसिंहः शिववीरेण सह बहुश आलप्य सेनाभिनिवेशविषये च सम्मन्त्र्य तदाज्ञातः स्व-वासस्थानं जगाम ।

शिववीरोऽप्यन्यसेनापतीन् यथोचितमादिश्य स्वशयनागारं प्रविश्य होरात्रयं यावत्किञ्चन निद्रासुखमनुभूय अल्पशेषायामेव रजन्यामुदतिष्ठत् ।

शिववीरसेनास्तु यथासङ्केतं प्रथममेव इतस्ततो दुर्ग-प्राचीरान्तरालेषु, गहनलताजालेषु, उच्चावचभूभागव्यवधानेषु सज्जाः पर्यवातिष्ठन्त । बहवोऽश्वारोहाः यवनपटकुटीर-कदम्बकं परिक्रम्य ततःपश्चादागत्य अवसरं प्रतिपालयन्ति स्म ।

"बहवो वयमद्य शिवमवश्यमेव विजेष्यामहे, परं तथापि न जानीमहे किमिति कम्पत इव हृदयम्, अहो विलक्षणः प्रताप एतस्य, पवनेऽपि प्रवहति, पतत्रेऽपि पतति, पत्रेऽपि मर्मरीभवति, स एवागत इत्यभिशङ्क्यतेऽस्माभिः" इति

प्रतिपालयन्ति—प्रतीक्षन्ते । मर्मरीभवति—(खड़खड़ायमाने) ।

चिन्ताचक्रमारूढा अपि च कथं कथमपि कैश्चिद् वीरवरै-र्वर्द्धितोत्साहाः समरभूमिमवातरन् ।

अथ कथंचित्प्रकाशबहुले संवृत्ते गोपीनाथपण्डितो वारमेकं शिववीरादिशि परतश्च यवनसेनापतिदिशि गतागतं विधाय सेनाद्वयस्य मध्ये एव कस्मिंश्चित् पटकुटीरे अपजलखानमानेतुं प्रबबन्ध ।

शिववीरोऽपि कौशेयकञ्चुकस्यान्तर्लौहवर्म्मपरिधाय सुवर्णसूत्रग्रथितोष्णीषस्याप्यधस्तादायसं शिरस्त्राणं संस्थाप्य सिंहनखनामकं शस्त्रविशेषं करयोरारोप्य, दृढबद्धकटिरपजलखानसाक्षात्काराय सज्जस्तिष्ठति स्म ।

अपजलखानोऽपि च "यदाहमेनं साक्षात्कृत्य करताडनमेकं कुर्य्याम्, तथैव तालिकाध्वनिसमकालमेव अमुकामुकैः श्येनैरिवापत्य पाशैरेष बन्धनीयः, सेनया च क्षणात् तत्सेना झञ्झया घनघटेवापनेया" इति सङ्केत्य सूक्ष्मवसनपरिधानो विविधवर्णवर्णनीयशिविकामारुह्य निर्दिष्टपटकुटीराभिमुखं प्रतस्थे । इतस्तु तुरङ्गं नर्तयन्, गौरसिंहेनानुगम्यमानो माल्यश्रीकप्रभृतिभिर्वीरवरैर्युद्धसज्जैः सतर्कं निरीक्ष्यमाणः शिववीरोऽपि तस्यैव सङ्केतितस्य समागमस्थानस्य

दिशि—(ओर) । झञ्झया—वेगवाहिना प्रभञ्जनेन (आंधी से) ।

निकटे एव सव्यकरेण वल्गामाकृष्याश्वमवारुधत् ।

ततस्तु इतोऽश्वात् शिववीरस्ततस्तु शिविकातोऽफजलखानोऽपि युगपदेवावातरत्, परस्परं साक्षात्कृत्य चोभावत्युत्सुकाभ्यां नयनाभ्यां सत्वराभ्यां पादाभ्यां स्वागताम्रेडनतत्परेण वदनेन आश्लेषाय प्रसारिताभ्यां च हस्ताभ्यां, कौशेयास्तरणविरोचितायां बहिर्वेदिकायां धावमानौ परस्परमालिलिङ्गतुः ।

शिववीरस्तु आलिङ्गनच्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं गृहीत्वा सिंहनखैर्जत्रुणी कन्धरं च समचूर्णयत्, रुधिरदिग्धं च तच्छरीरं कटिप्रदेशे समुत्तोल्य भूपृष्ठेऽपोथयत् ।

तत्क्षणादेव च शिववीरध्वजिन्यां महाध्वज एकः समुच्छ्रितः । तत्समकालमेव यवनशिबिरस्य पृष्ठस्थिता शिववीरसेना शिविरमग्निसात् कुर्वती, पुरःस्थितसेनासु च अकस्मादेव महाराष्ट्रकेसरिणः समपतन् । तेषां हर हर महादेव गर्जनपुरस्सरं छिन्धि भिन्धि मारय निपोथय कोलाहलः प्रत्यर्थिनां च खुदातोबाह्लादि मात्स्यपदमयः कलकलो रोदसी समपूरयत् ।

वल्गाम्—(लगाम) । जत्रुणी—स्कन्धसन्धी । कन्धरम्—ग्रीवाम् । समुत्तोल्य—उत्थाप्य । अपोथयत्—अपातयत् (पटक दिया) । ध्वजिन्यां—सेनायाम् । निपोथय—ताडय । प्रत्यर्थिनाम्—शत्रूणाम् । रोदसीम्—द्यावापृथिव्योर्मध्यम्—अन्तरिक्षम् ।

ततः केचन यवना महाराष्ट्रासिभुजङ्गिनीभिर्दन्दश्यमानास्त्रायस्व त्रायस्वेति साम्रेडं व्याहर–माणाः पलायन्त, अन्ये धीरा वीराश्च "तिष्ठत रे तिष्ठत धूर्तधुरीणा महाराष्ट्रहतकाः, किमिति चौरा इव लुण्ठका इव दस्यव इव च यवनसेनापतीनाक्रम्यथ" इति सक्ष्वेडं संगर्ज्य युद्धाय सज्जाः समतिष्ठन्त।

तेषां चाश्वानां सव्यापसव्यमार्गैः खुरक्षुण्णा व्यदीर्यत वसुधा, खड्गखटखटाशब्दैः सह च प्रादुरभूवन् स्फुलिङ्गाः। रुधिरधाराभिः जपासुमनस्समाच्छन्नमिवाभूद्रणाङ्गणम्।

तदवलोक्य गौरसिंहो मृतस्यापजलखानस्य शोणितशोणं शरीरं प्रलम्बवेणुदण्डाग्रेषु बद्ध्वा समुत्तोल्य सर्वान् संदर्श्य सभेरीनादं घोषितवान् यद् "दृश्यतां दृश्यतामितो हतोऽयं यवनसेनापतिस्ततश्चाग्निसात्कृतानि सकलसामग्रीजातानि शिविराणि परितश्च बहूनि विनाशितानि यवनवीरकदम्बकानि, तत् किमिति अवशिष्टा यूयं मुधा वृकगृध्रशृगालानां भोज्याः संवर्तध्वे। शस्त्राणि त्यक्त्वा पलायध्वं पलायध्वं यथा नेयं भूः कदुष्णैर्भवतां सद्यश्छिन्नगलरुधिरप्रवाहैरार्द्राभवेदिति।

सक्ष्वेडम्—सगर्वम्। स्फुलिङ्गाः—अग्निकणाः। संवर्तध्वे—भवथ।

तदवधार्य दृष्ट्वा च रुधिरादिग्धं क्रीडापुत्तलायितं स्व स्वामिशरीरं सर्वेऽपि हतोत्साहा विसृज्य शस्त्रास्त्राणि भयद्रुताः दिशो भेजुः ।

ससेनः शिववीरश्च विजयशङ्खनादैः रोदसी संपूर्य रणाङ्गणशोधनाधिकारं माल्यश्रीकाय समर्प्य प्रतापदुर्गं प्रविश्य मातुश्चरणौ प्रणनाम ।

कर्णपर्व

अथ दुर्योधनः कर्णमामन्त्र्याबभाषे—'सखेऽङ्गराज, अध्यक्षीकृतौ हि भीष्मद्रोणौ प्रत्यहं येन केनापि व्यपदेशेनास्मदीयानेव घातयित्वा, विवक्षितबाह्येनाडम्बरेण यापितार्धमासौ स्वयमशाम्यताम्। न खलु परत्र बद्धपक्षो हैमनस्तपन इव मन्दायमानतेजाः प्रतप्तुमीष्टे। तदास्ताम्। भवता तु मयि मदमित्रे च विभज्य संवर्धितयोः प्रीतिद्वेषपादपयोरयमेवावसरः फलितुम्। तस्मात्समारुतेन धनञ्जयेनोपधूपितान् जीवनार्थिनोऽस्माननुगृहाण। गृहाण चेदमाध्यक्ष्यम्' इति सप्रशंसं सेनाधिपत्येऽभिषिक्तवान्। तथाभिषिक्तः स सोत्साहं परवाहिनीं प्रविश्य तीक्ष्णतरं प्रहरन्, आत्मनो वैवस्वतत्वं परेषां मनस्यर्थान्तरतया ग्राहयामास। तत्र तस्य वधप्राप्तं नकुलं कुन्तीप्रतिज्ञास्मृतिः सहसाविर्भूय ररक्ष। अत्रान्तरे दुर्योधनं हन्तुमुद्यतो युधिष्ठिरः 'कथं भवा-

---

आमन्त्र्य—आहूय, सम्बोध्य वा। व्यपदेशेन—व्याजेन (बहानेसे)। परत्र—शत्रौ, बद्धपक्षः—कृतपक्षपातः। हैमनः—हेमन्तस्य ऋतोः। तपनः—सूर्यः। प्रतप्तुम्—शत्रून् संतापयितुम्, सूर्यपक्षे—तीव्रातपं जनयितुम्। ईष्टे—प्रभवति। फलितुम्—फलवन्तौ भवितुम्। मारुतः—भीमः। उपधूपितान्—संतापितान्। आध्यक्ष्यम्—सेनापतित्वम्। परवाहिनीम्—शत्रुसेनाम्। वैवस्वतत्वम्—यमराजत्वम्। अर्थान्तरतया—रूपान्तरेण। वधप्राप्तम्—वधयोग्यावसरं प्राप्तम्।

नार्यतमोऽपि कदर्य इव परकीयाय स्पृहयति। ममांशभूता हि धार्तराष्ट्राः। तदलमेतस्य वधेन' इति भीमेन निषिद्धो विरराम। तावद् द्रौणिना पीड्यमाने स्वबले, कुपितौ माद्रेयौ द्रौपदेयैः सह परानीकं प्रविश्य कदलीवन-प्रविष्टाविव वेतण्डौ बहुशः पातयामासतुः।

सप्तदशे दिवसे कर्णः सुयोधनं प्रोवाच—'महाराज, प्रहरणादिना मत्तोऽविशिष्टोऽपि पार्थो विशिष्यते श्लाघ्य-भूतेन सूतेन। तस्माच्छौरिकल्पं मद्रराजं मम सारथिं कल्पय, आकल्पय च गाण्डीविनः शिरःखण्डेन तव केतुदण्डम्। तेन वाक्येन लब्धमनोरथ इव स मूढः सपदि शल्यमेत्य साभ्यर्थनमूचे—मातुल, अद्यत्वे भवान् कर्णश्च द्वावेव महारथौ महाशयौ च मन्मनोरथकल्पद्रुमौ। अतो मन्ये युवामपि कृष्णार्जुनाविवैकरथस्थावेव समरं निर्वहन्तौ विज-योत्तरौ भविष्यतः। तत्र चार्जुनस्य कृष्ण इव भवान् कर्णस्य सारथ्यमास्थाय, तं सर्वास्वापत्सु गोपायतु। तच्छ्रुत्वा स सक्रोधं प्रत्याह—ननु भोः किमेवमनर्हं मन्त्रयसे, यन्मां

शौरिकल्पम्—कृष्णसदृशम्। मद्रराजम्—शल्यम्। आ-कल्पय—अलङ्कुरुष्व। गाण्डीविनः—अर्जुनस्य। केतुदण्डम्—ध्वजदण्डम्। सपदि—तस्मिन्नेवक्षणे (फौरन)। विजयोत्तरौ—विजयवन्तौ। अनर्हम्—अयोग्यम्। मन्त्रयसे—भाषसे।

कर्णादवहनिबलं तस्य नियोज्यं च चिकीर्षसि । कथं वा मूर्धावसिक्त आधिरथेर्भृत्यो भवतु । परंतु यं मम भागं कल्पयसि अथवा सर्वानेव तव द्विषः कथाशेषान् करिष्यामि । तदलं मान्यविमाननयेति । दुर्योधनस्तु पुनस्तं सानुनयमाह—'मातुल, भवन्तं वासुदेवसदृशं मत्वा कर्णस्य गुप्त्यर्थमर्थये, न पुनः कदर्थये । न च सूतकर्म कुर्वन्नर्वाचीन इति नियमः । श्रूयते हि त्रैपुरे सम्प्रहारे रुद्रस्य सारथ्यं कुर्वन्हिरण्यगर्भः । किं तस्य निकृष्टता । मा च कर्णं दौष्कुलेयं शङ्किष्ठाः । रूपमेव व्याचष्टे तस्य माहाकुलीनतां श्वैतच्छत्रिकतां च । अतो महानुभाव, तं महाभागं विषमेषु धारयमाणो भवन्, व्यसनार्णवे मग्नानां कुरूणां मद्रराजः कर्णधार इति कीर्तिं प्रपद्यस्व' इति । तदनु तदनुनयेन प्रवणीभूतः स युधिष्ठिरवाक्यं संस्मृत्य प्रत्याह—'ननु मनीषिन्, सुविशारदा ते मनीषा, सूनृता ते भणितिः, यन्मम सारं वासुदेवस्येव निर्णीतवानसि । अतोऽप्रत्याख्येयं तेऽभ्यर्थनम् । किं तु

नियोज्यम्—आज्ञावर्तिनं किङ्करम् । मूर्धावसिक्तः—क्षत्रियः । आधिरथेः—सूतपुत्रस्य-कर्णस्य । विमानना—तिरस्कारः । कदर्थये—तिरस्करोमि । अर्वाचीनः—लघुः । त्रैपुरे—त्रिपुरासुरसम्बन्धिनि । सम्प्रहारे—संग्रामे । दौष्कुलेयम्—दुष्कुलोत्पन्नम् । अप्रत्याख्येयम्—निषेधायोग्यम् ।

पार्थः कृष्णस्येव हितैषिणो ममावसरेषु स्वैरालापं मर्षेण यद्यनुमन्ता कर्णस्तदा तस्य यन्ता स्याम्' इति ।

तथाभ्युपगच्छतः कर्णस्य रथ्यानां प्रग्रहान्गृह्णन् शल्यः 'अभिवानरध्वजमश्वांश्चोदय' इति तेन नुन्नस्तमूचे—'सूतपुत्र, नेयं विहारसंसत्, यत्र स्वैरं विकत्थमानस्त्वमप्रगल्भैर्महान्महीयसे । इदं तु पौरुषनिकषभूतं वीराशंसनं हि । यन्मन्यसेऽतिबलेन स्पर्धा आत्मन उत्कर्षायेति, तदपेशलम् । पश्य पावकेन वैरायमाणस्य पतङ्गस्य गतिम् । तस्माद्यद्यात्मनः पथ्यमिच्छसि, तज्जहिहि पार्थाभियोगमनोराज्यम्' इति । तदनादृत्य 'नुद नुदाश्वान्' इति वदति कर्णे, तथा कुर्वन् शल्यस्तमुवाच—भोः, पश्य प्रथम एव विक्रमणे प्रस्खलतस्तव वाहान् । दृश्यन्ते च विपरीतान्येव निमित्तानि । अतो न प्रसीदति मे हृदयम् । यदि मद्वचनमुल्लङ्घ्य गमिष्यसि, तदा गमिष्यस्येवेति । तदप्यसत्कृत्य संग्रामभुवमवतरन्

मर्षेण—सहिष्णुतया । यन्ता—सारथिः । रथ्यानाम्—अश्वानाम् । प्रग्रहान्—रश्मीन् (बाग) । अभिवानरध्वजम्—अर्जुनभिमुखम् । चोदय—प्रेरय (हांको) । नुन्नः—प्रेरितः । विकत्थमानः—आत्मानं श्लाघमानः । अप्रगल्भैः—अविशिष्टबुद्धिभिर्नरैः । महीयसे—आदरं लभसे । इदं तु—रणक्षेत्रम् । पौरुषनिकषभूतम्—(पराक्रम की कसौटी) । वीराशंसनम्—वीरा एव इदमाशंसन्ति—कामयन्ते, नेतरे ।

कर्णः सेनाग्रस्थानप्राक्षीत्—सूत क तिष्ठत्यर्जुनः। तं ब्रुवन् पारितोषिकमादत्तामिति। तस्य तथा गर्जितमसहिष्णुः शल्यः कर्णमुवाच—'रे राधापुत्र, भीष्मद्रोणादयो बहवो दोष्मन्तो, यत्समक्षमर्जुनेन पराभूतास्तेषामेव पुरः कोऽयं वागाडम्बरः। परिहसन्ति त्वां वृथावाचाटोऽयमिति। त्वं तु निर्लज्जोऽसि। तदलमनया निरर्थिकयारभट्या' इति। तदमृष्यमाणः कर्णस्तमधिक्षिप्तवान्—'अरे प्रच्छन्नशत्रो, न त्वामिदं पृच्छामि। स्वाधिकारानुरूपमपृष्टोत्तरं च जल्पन्दण्ड्योऽसि। यदीदृशान्यक्षरमलानि पुनरपि जिह्वायां धारयसि, तदा तव जिह्वामनेन कृपाणधाराजलेन संस्कर्तास्मि' इति तं तर्जयामास। तत्प्रसङ्गेन कलहायमानावस्युद्यतौ च तौ रथिसारथी सान्त्वयित्वा सुयोधनस्ताभ्यां समं समरमध्यमवततार।

तत्र शूरसेनान्पञ्चालानन्यांश्च बहून्निहत्य युधिष्ठिरं व्यथयन्तं कर्णं विसंज्ञं कुर्वन्वृकोदरस्तत्पुत्रं भानुसेनं तथा सप्त धार्तराष्ट्रांश्च निष्पिपेष। लब्धाश्वासः कर्णस्तु माद्रे-

---

अधिक्षिप्तवान्—भर्त्सितवान्। अक्षरमलानि—दुर्वचांसि। तर्जयामास—भर्त्सयामास। अस्युद्यतौ—उद्यतखड्गौ। सान्त्वयित्वा—अनुनीय। शूरसेनान्—शूरसेनदेशवासिनः क्षत्रियान्। पञ्चालान्—पञ्चालदेशवासिनः क्षत्रियान्। विसंज्ञम्—चेतनारहितम्। वृकोदरः—भीमः। निष्पिपेष—चूर्णयामास। लब्धाश्वासः—प्राप्तचेतनः।

याभ्यां सह पुनर्युद्धायापतन्तं युधिष्ठिरं भृशमर्दयन् प्राणसंशयं गतं तं रक्षितुकामेन शल्येनाख्यायि—भो महावीर कर्ण, विक्रान्तस्य तव किमेभिर्वराकैः। न खलु मृगेन्द्रो गजेन्द्रादृतेऽन्यं मृगं मृगयते। तस्मादभियुज्यस्व धार्तराष्ट्रकुलसर्वङ्कषं वृकोदरम्। तथेति निवृत्ते कर्णे, युधिष्ठिरो माद्रेयाभ्यां सह त्वरिततरं शिबिरं प्रविश्य श्रान्तः शय्यामधिशिश्ये।

अत्रान्तरेऽल्पावशिष्टं संशप्तकगणं निहत्य तदाहवमवभृथीकृत्य प्रतिनिवर्तमानः पार्थः संकुलयुद्धभुवि तीक्ष्णतरं प्रहरन्तं कर्णं वीक्ष्य, मृदङ्गध्वजाङ्कितं युधिष्ठिरस्य रथं, तथा शरभहंसलक्षणौ नकुलसहदेवयो रथौ चापश्यन् शङ्कितः सत्वरं सिंहध्वजं रथमभिपत्य तत्रस्थं बलवत्प्रहरन्तं भीमं 'क्वास्माकं ज्येष्ठः' इति पप्रच्छ। नाहं जानामीति तेन प्रत्युक्ते ससंभ्रमं शिविरमासाद्य तत्र तं पश्यन् हृष्टोऽर्जुनः कृष्णेन सह तस्य पादौ जग्राह। स त्वनवसरे प्रत्यागतौ सहर्षं प्रणमन्तौ च तौ कृष्णार्जुनौ दृष्ट्वा, कर्णं निहतं निश्चित्य पप्रच्छ—'वत्स गाण्डीविन्, कथं तं दुरात्मानं सूतपुत्रं न्यवधीस्तद्विस्तरेण ब्रूहि। न हि भीष्म-

आख्यायि—उक्तः। अभियुज्यस्व—युध्यस्व। सर्वङ्कषम्—पीडकम्।

द्रोणौ चास्य कर्णस्य कलामप्यर्हतः। महानरातिरयमस्माकम्। अद्यापि न मुञ्चति मां तद्रणजनितः कम्पः। अथवा ईषज्जयोऽयं गाण्डीवसहायस्य तव, तथापि महत्कौतूहलम्। तदाचक्ष्व' इति। आर्य, तवादर्शनजेन खेदेनात्र प्रधावितोऽस्मि, न तु रिपुमर्दनजेन मोदेनेति तेन प्रत्युक्ते, आजन्मनोऽभूतपूर्वेणामर्षेण दुर्निरीक्षो राजा युधिष्ठिरस्तं विजगर्हे 'धिक्त्वां गेहेक्ष्वेडिनम्। यस्त्वं पूर्वं प्रसङ्गे प्रसङ्गे कर्णं नखनिर्भेद्यमित्र सावज्ञया गिरा तिरस्कृत्य, प्राप्तेऽवसरे एवं कातरोऽसि। ईदृशस्य तव किमनेन भारभूतेन गाण्डीवेन। दीयतामन्यस्मै यः कर्णं प्रतियोत्स्यते' इति। तत्क्षणं खड्गं परामृशन्नर्जुनः 'किमर्थमस्थाने शस्त्रमन्विष्यसि' इति भगवता पृष्टः प्रत्याह—'सखे माधव, गाण्डीवमन्यस्मै देहीति यो मामधिक्षिपति, स मे वध्यः' इति ममेदमुपांशुव्रतम्, यथा तूबुरशब्देनाधिक्षेपे भीमव्रतम्। शृण्वत एव तव तिरस्कृतगाण्डीवस्यास्य शिरः खड्गेनोत्कृत्य सत्यव्रतो भवितुमाशंसे, इति। भगवांस्तु तं धिक्कारपूर्वं निर्भर्त्सयामास,

---

अरातिः—शत्रुः। ईषज्जयः—अञ्जसा जेतुं शक्यः। अमर्षेण—क्रोधेन। दुर्निरीक्षः—दुरालोकः। विजगर्हे—निनिन्द। गेहेक्ष्वेडिनम्—गेहेशूरम्। परामृशन्—स्पृशन्—गृह्णन्। अस्थाने—असमये (बे मौके)। उपांशुव्रतम्—अन्यैरज्ञातं मनसि कृतं व्रतम्।

'आः पातकिन्, कथमादित्यमिव सर्वलोकनमस्कार्यं, मूर्तिमन्तमिव धर्माधिदेवं, समस्तकल्याणगुणनिधानं मृदुं शुचिं शान्तं सुगृहीतनामधेयं सम्राजं पितृकल्पं ज्येष्ठभ्रातरमजातशत्रुं जिघांसन्नापत्रपसे। अहो समीचीनमारब्धं त्वया। गुरुहत्ययाप्यवश्यं पालनीयं खल्विदं महाव्रतम्। कार्यानुरोधेन हि सत्यधर्मयोर्व्यवस्था, न पुनर्यथाश्रुतमात्रेण। अन्यथा हि महाननर्थः स्यात्। श्रूयते हि पुरा कौशिको नाम तपस्यन् कश्चिद्ब्राह्मणः प्राणभयात्स्वाश्रमे गलीनान् विप्रान् पृच्छद्भ्यो दस्युभ्यः 'मया सत्यमेव वक्तव्यं' इति निश्चित्य कथयामास। तैस्तेषु बलान्निहतेषु तत्पातकेन स तपस्वी नरकमियाय। एवं च तदिदं सत्यवचनं पीडामात्रफलकत्वेनाधर्मो बभूव। गहना हि सत्यधर्मयोर्गतिः। पश्य। पुरा कश्चिद् व्याघ्रस्तोव्रेण तपसा बहून्वरानवाप्य लोकोपद्रवाय व्यजृम्भत। तेन जगतः क्षोभमाशङ्क्य विधाता तं चक्षुर्भ्यामन्धं चकार। तथापि प्रचण्डवीर्यतया भयानकं व्याघ्रं मारयन् कश्चिद् व्याधः सकुटुम्ब एव स्वर्गमियाय। तस्य सा हिंसा माहाजनिकतया धर्मो बभूव।

पितृकल्पम्—पितृसदृशम्। जिघांसन्—हन्तुमिच्छन्। अपत्रपसे—लज्जसे। कार्यानुरोधेन—कार्यानुसारेण। प्रलीनान्—अन्तर्हितान् (छिपे हुए)। व्यजृम्भत—व्यचेष्टत। माहाजनिकतया—महाजनहितकारकत्वेन।

एवं स्थिते, स्वबुद्धिपरिकल्पितस्य निष्प्रयोजनस्य व्रतस्यार्थे गुरुहत्यामाचरंस्त्वं कथंतरामन्धतामिस्रं न विशेः । तदलमनेन दुरध्यवसायेन' इति ।

तदाकर्ण्य संजातवेपथुः पार्थः प्रार्थयामास—'भगवन्, यथा मम सत्यव्रतत्वमार्यवधपातकनिवृत्तिश्चोभयमपि स्यात्तथा त्वमेव संचिन्त्य विधत्स्व' इति । 'भोः पार्थ, न्यक्कुरु ज्येष्ठं कतिपयाक्षरैरुपालम्भवचनैः । वधादभ्यधिको हि मान्यानां तिरस्कारः । ततश्चोभयपरिहारं प्राप्स्यसि' इति तेन दर्शितोपायः स खड्गं न्यस्याग्रजं गर्हयामास—'अरे भीरो, समरात्पलायमानस्य तव कथं युधिष्ठिरता । ईदृशस्त्वं वीरगणनासु कनिष्ठिकास्थं मां क्षिपन्न जिह्रेषि । यदि कदाचिद्भीमसेनो मामेवं गर्हयेत्तस्य तत्क्षमं स्यात् । अरातिकुलोन्मूलनऽलंकर्मीणो हि सः । त्वं पुनर्वित्तमर्जयितुं शत्रुमर्दयितुं वा अक्षमः क्षमामभिनयन्, मद्बलार्जितानि धनानि दारांश्च कदर्थीकृत्य, महदिदमाक्षद्यूतिकं वैरं चोत्पाद्य, त्वदर्थे क्लिश्यमानानस्मानेव

दुरध्यवसायेन—दुर्निश्चयेन, दुष्टकर्मणा वा । वेपथुः—कम्पः । युधिष्ठिरता—युधि संग्रामे, स्थिरता—दृढत्वम् । जिह्रेषि—लज्जसे । अलंकर्मीणः—समर्थः । आक्षद्यूतिकम्—अक्षद्यूतेन जातम् ।

निन्दसि। धिक्त्वाम्' इति एवमधिक्षिप्य पुनः खड्गं परामृशन् सः 'किमन्यत्तवोपांशु व्रतम्' इति कृष्णेन पृष्टः सन् 'भगवन्, किमन्यत्। अनुद्यनामानमनवद्यमहिमानमार्यमेवमपोद्य, कां गतिं प्रतिपद्येय। तदद्यैव स्वशिरः संछिद्य तेन तद्दुष्कृतस्य निष्कृतिं चिकीर्षामि' इति प्रत्युत्तरयामास। कृष्णस्तु तं सावज्ञमाह—'अयि विवेकविश्रान्त, अनेन पश्चात्तापेनैव कृतप्रायश्चित्तोऽसि। तदलमलमन्धतमसप्राप्तिहेतुभूतया आत्महत्यया' इति तं निवारयामास। तावत् 'भोः कृष्ण, श्रुतं श्रोतव्यम्। किमितः परमुक्तेन। एवं विगीतकर्माहमद्यैव वनं प्रव्रक्ष्यामि। कामं महात्मना भीमेन सह महावीरोऽर्जुनः सुखं वसतु' इति सनिर्वेदमुक्त्वोत्तिष्ठन्युधिष्ठिरः 'मत्कृत इदमेकमागः क्षन्तव्यं' इति पादयोर्निपत्य याचमानेन कृष्णेनानुनीतः प्रकृतिमापद्यत।

अथ सुमनीकृतेन तेनानुज्ञातौ कृष्णार्जुनौ यावद्युद्धभुवमवतरतस्तावत्कर्णः स्वपुत्रान् सुषेणादीन्हतान्वीक्ष्य क्रुद्धो बहूनि परबलानि क्षपयामास। अत्रान्तरे भीमो दुःशासनं हठादाकृष्य भूमौ निपात्य पद्भ्यां तत्कण्ठं शिरश्चाक्रम्य

अपोद्य—विनिन्द्य। निष्कृतिम्—प्रायश्चित्तम्। विवेकविश्रान्त—विवेकरहित। विगीतम्—निन्दितम्। आगः—अपराधः।

तिष्ठन्नुच्चैर्जगर्ज 'भोः कुरवः, किमिति सर्वेऽपि यूयमुपेक्षध्वे पाञ्चालीपराभवजनितक्रोधानलदह्यमानतयातितृषितेन मया क्षतजपानाय विदीर्यमाणहृदयं युष्माकं युवराजं दुःशासनम्' इत्युद्घुष्य गदाप्रहारोद्वमितं तद्वक्षोरुधिरं पायं पायं 'गौगौंः' इति ननर्त । तत्क्षणं प्रचण्डतरेण विकृतेन च तदाकारेण भीतभीतेषु सर्वतः पलायितेषु बलेषु, 'आहर प्रहर' इत्यापतन्तो दश धार्तराष्ट्रास्तस्य महासाहसिकस्य प्रतापानले शलभांबभूवुः ।

अथ पश्यत एव कर्णस्य तत्पुत्रं वृषसेनं निहत्य युद्धोद्यतेऽर्जुने स्वपुत्रवधेनोपचितक्रोधेऽरिमभियुञ्जाने च कर्णे, दिवि युद्धदिदृक्षयागता देवा अर्जुनतः, आदित्याः कर्णतश्चाभवन् । तत्र च 'जयतु पार्थः' इति 'कर्णः' इति च विवदमानौ तत्पितराविन्द्रविकर्तनौ सान्त्वयन् पितामहः 'अस्मिन् संपरायेऽर्जुनस्य जयोऽस्तु, कर्णस्तु सांपरायिकं जयमप्रतिबन्धेन लभताम्' इति व्यवस्थापयामास । तौ कर्णार्जुनावुभावपि लघुहस्ततया कृतहस्ततया चानिमिषैरप्यनवगाह्यप्रयोगान्तरौ प्रतिक्षणमनिलमयमचलमयमनलमयम-

---

क्षतजम्—रुधिरम् । शलभांबभूवुः—शलभा इव आचेरुः—दग्धा इत्यर्थः । अभियुञ्जाने—आक्रामति । संपराये—संग्रामे । सांपरायिकम्—पारलौकिकम् ।

भ्रमयमन्यमन्यं चास्त्रशस्त्रकलापं विसृजन्तौ सृजन्तौ च तेजोमयं तिमिरमयं शीतमयमशीतमयं च भुवनतलं, चिरमप्यविश्रान्तावयुध्येताम् ।

अत्रान्तरे पूर्वं खाण्डववने पार्थेन हतजननीकश्छिन्नवालश्च ःस्तस्मिन्बद्धवैरः समयाकाङ्क्षी च स्थितस्तक्षकपुत्रोऽश्वसेनो नामोरगः स्वयं योगबलेन कर्णस्य शरं प्रविवेश । तदविद्वान् कर्णस्तं शरं प्रयुञ्जानस्तद्विदा शल्येन निषिद्धोऽपि तदनादृत्य पार्थाय प्रयुयुजे । देवराजस्तु 'धिक्परस्यार्थे स्वजनाय द्रुह्यन्तम् । यदयं दुरात्माश्वसेनो यस्मान्मया प्रयत्नाद्रक्षितस्तमेव ममात्मजं जिघांसति' इति प्रव्यथितो बभूव । तावत्सारथिना विश्वम्भरेण स्वपदाङ्गुष्ठनिष्पीडिते किष्कुमात्रं भुवि मग्ने तद्रथे, शिरो लक्ष्यीकृत्य प्रयुक्त तदस्त्रं किरीटिनः किरीटमाच्छिद्यापयातम् । तेन विषण्णस्ताक्षकिः कर्णं स्ववृत्तान्तमावेद्य, अभिहृदयं पुनः प्रयोगाय तं चोदयामास । 'कथमेकमस्त्रं द्विः प्रयुञ्जीत कर्णः । कथं च वा पराश्रयेण स्वस्मिन्मिथ्यागौरवितो भवतु । त्वदृतेऽपि शक्त एवाहमर्जुनं हन्तुम् । तद् गम्यताम्' इति

किष्कुमात्रम्—किष्कुः—परिमाणविशेषः, तन्मात्रम् । किरीटिनः—अर्जुनस्य । ताक्षकिः—तक्षकपुत्रः । अभिहृदयम्—हृदयाभिमुखम् ।

तेन प्रत्याख्यातः सोऽश्वसेनः स्वयमेव पार्थं जिघांसुरभिपतन् ग्रीवां खण्डयता तेन स्वमातुः पदवीं निन्ये ।

अनन्तरं प्रयुयुक्षिते ब्रह्मास्त्रेऽप्रतिभाते भुवि मग्ने च स्यन्दने, सम्भ्रान्तस्तूर्णं रथादवतीर्णः कर्णः 'भोः पार्थ, क्षणं विश्राम्यतु भवान् यावदहं रथं समेऽवस्थापयामि । न खलु वीरा विशस्त्रं कार्यान्तरव्यग्रं वा शरस्य शरव्यं कुर्युः' इति प्रोवाच । 'अहो विषमस्थः सर्वोऽपि धर्मं पश्यति, न सुखस्थः । किमयं धर्मो द्यूतकालेऽनेन नाधीतः । किं विलम्बसे । हन्यतामयं दुरात्माधुनैव' इति कृष्णेन नुन्नोऽर्जुनो दिव्यास्त्रेण भूमिष्ठमेव तं वीरप्रकाण्डं वीरशय्यायां शाययति स्म । तस्य कर्णस्य शरीरोत्थं दिव्यं ज्योतिः पश्यतामेव सर्वेषां ज्योतिर्मालिनो मण्डलमाविवेश ।

सपदि पाण्डवबलैर्हन्यमानासु जयभेरीषु, दुर्योधनस्तद्दुःखं सोढुमपारयन्विललाप—'हा पुरुषभूषण, पुरुषपुंगव, पुरुषोत्तम, वैकर्तन कर्ण, सौन्दर्येण वीर्येण शौर्येणौदार्येण गाम्भीर्येण मेधया प्रतिभया वा त्वत्सदृशः पुरुषो न भूतो न च भावी । यस्य तवैकोद्यमजय्यं जगत्, पुरुष-

---

शरव्यम्—लक्ष्यम् । विषमस्थः—विपद्ग्रस्तः । ज्योतिर्मालिनः—सूर्यस्य । वैकर्तन—विकर्तनस्य—सूर्यस्य पुत्र ।

काम्यं रूपम्, सुरेश्वरार्थिकं वादान्यकम्, विपक्षाक्षोभ्यं चित्तस्थैर्यम् । तादृशस्त्वमार्जवैकपरायणः कुसृतिशरणैः पापैरिमां दशां गमितोऽसि । त्वयि कीर्तिशेषे संवृत्ते किं मम जीवितेन' इति भुवि निपत्य मुमोह । पुनराश्वासितः स शल्यं सेनापतिं विधाय, तेन सह मितपरिवारः पुत्रशोकेनैव तिरोहिते विवस्वति, स्वशिविरमगात् । युधिष्ठिरस्तु प्रहृष्टोऽर्जुनमालिङ्ग्य 'अद्य राजास्मि संवृत्तः' इति वदन् कृष्णार्जुनादिभिः सह महता जयघोषेण मुखरायमाणदिक्चक्रवालः स्वस्कन्धावारमासाद्य सुखमासांचक्रे ।

इति ।

सुरेश्वरार्थिकम्—इन्द्रोपि यत्र याचकः । वादान्यकम्—वदान्यता—दानशूरता । विवस्वति—सूर्ये ।